॥श्रीमदृगर्थमंजरी श्रीमद्राघवेंद्रतीर्थकृता प्रारब्धा॥

॥श्रीगुरुभ्योनमः॥ हरिः ॐ॥ निर्विघ्नमस्तु॥ ॥आग्नेयमाधं सूक्तं नव चैव गायत्री छंदस्कं॥ स्तुत्यताप्रयोजकाग्रणीत्वप्रतिपा
दकत्वादग्निशब्दस्य प्राथम्यं॥ तदुक्तं भाष्ये॥ अग्रणीर्भवति यदग्निर्लेभित्यग्रे नाम तद्ववेदिति॥ अनुक्रमणिकायामपि॥ अथा
तोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवति अग्रं ह्येषु प्रणीयते अंगं नयती
ति॥ अग्निरेवैतद्गुणविशिष्टत्वात्प्रथमं स्तूयते॥ ऋगर्थस्त्रिविधः॥ एकस्तावत्प्रसिद्धाग्न्यादिरूपः॥ अपरस्तदंतर्गतपरमा
त्मलक्षणः॥ अन्योऽध्यात्मरूपो भक्तदेहगतः॥ तत्त्रितयपरेयं ऋक्॥ अग्निं भाष्योक्तरीत्या अग्रत्वप्रज्वलत्वादिगुणविशिष्टं
प्रसिद्धाग्निं तदंतर्गतभगवद्रूपविशेषं अध्यात्मगतरूपविशेषं च ईडे स्तौमि॥ ईड स्तुतौ॥ ऋक्षु डस्य ळः प्रायेण॥ अग्म

॥श्रीगुरुराजायनमः॥ ॥अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं॥ होतारं रत्नधातमं॥
॥अग्निं। ईळे। पुरःऽहितं। यज्ञस्य। देवं। ऋत्विजं॥ होतारं। रत्नऽधातमं॥

ध्यस्थ डकारस्य ळकारं बह्वृचोजगुरित्युक्तेः॥ कस्मादयं स्तुत्य इति तत्राह॥ पुरोहितमिति॥ पुरः पूर्वमेव हितं अशे
षेभ्योऽनादिकालत एव हितमित्यर्थः॥ पूर्वाधरावराणामसि पुरध वश्चैषामिति पूर्वशब्दादसि प्रत्यये पूर्वशब्दस्य
पुरादेशे च पुर इति रूपं॥ तथा चाशेषहितत्वात्स्तुत्य इत्युक्तं भवति॥ स्तुत्यतायां निमित्तांतराण्युच्यंते॥ यज्ञस्य ऋत्विज
मित्यादिना॥ यज्ञस्य जातावेकवचनं॥ यज्ञानां बाह्ययज्ञानामाध्यात्मिकानां च ऋत्विजं॥ ऋत्विक् यामकत्वेन ऋत्विक्छब्द
वाच्यं॥ तदधीनत्वादर्थवदिति न्यायेन अव्यक्तादिशब्दप्रवृत्तिनिमित्तस्यान्यगतस्यापि भगवदधीनत्वात्॥ यदधीनो गु
णो यस्य तद्गुणी सोऽभिधीयत इत्युक्तेश्च॥ ऋत्विग्गतयजनकर्तृत्वरूपस्य च हि ऋत्विक्स्य परमात्माधीनत्वात्तयोः भेदस्य समव
तजयस्वामिनिराजनिजयि शब्दवाच्यते वऋत्विक्शब्दवाच्यता युक्तेति भावः॥ अध्यात्मे ज्ञानयज्ञे इंद्रियाभिमानि

श्रीराम
१

नो देवा ऋत्विजः॥ बाह्यऋत्विग्गतकर्मांगत्वगुणयोगात्॥ तन्नियामकत्वाद्धरिः ऋत्विगुच्यत इत्यर्थः॥ किंच देवं स्तुतिकर्मत्वा
द्देवाख्यं॥ दीव्यतेः स्तुत्यर्थत्वात्कर्मणि घञ्॥ अकर्तरि च कारके संज्ञायामिति घञः कर्मण्यप्यनुशिष्टत्वात्॥ द्योतनादिक
र्तृत्वमपि देवशब्दार्थः॥ दीव्यतेः पचाद्यचि निष्पन्नस्य देवशब्दस्य द्योतकत्वाद्यर्थत्वात्॥ तदुक्तं भाष्ये॥ द्योतनाद्विजया
कांत्यास्तुत्यावबहुतेरपीति॥ किंच होतारं होतृसंस्थं होतृनियामकत्वात् इंद्रियाग्निष्वर्थानां होतृत्वात् इंद्रियविष
यसंबंधसंपादनेन विषयानुभवप्रदत्वात् होतृनामकमित्यर्थः॥ परमसुखप्रदत्वात्तस्य स्तुतिर्भोगार्थिनो युक्तेत्याह॥
रत्नधातममिति॥ रमु क्रीडायामित्यस्मादौणादिके रमेस्त्तच इति न प्रत्यये तकारे तादेशे च निष्पन्नस्य रत्नशब्दस्य रतिरर्थः॥
रत्नं रतिं धत्ते ददातीति रत्नधाः॥ आतो मनिन्क्वनिब्वनिपश्चेति चकाराद्विच्॥ तस्य सर्वापहारी लोपः॥ अतिशये
न रत्नधाः रत्नधातमः॥ तं॥ ततश्च स्तुत्यताप्रयोजकगुणयोगादग्निशब्दवाच्यस्य हरेः स्तुतिर्युक्ता॥ प्रसिद्धाग्न्यादि
षु लौकिकप्रसिद्ध्या रूढिः॥ परमात्मनि तु महायोगविद्रूढी॥ प्रवृत्तिनिमित्तपोषकत्वात्॥ यमिंद्रमाहुरित्यादिना
वैदिकप्रसिद्धेश्च॥ अत एव भगवान् सर्ववेदानां परममुख्यार्थ इति हृदयं॥ ॥इति प्रथमा ऋक्॥१॥ ॥१॥ ॥ ॥
॥अथ द्वितीया॥ आचारोऽप्यस्तीत्युच्यते॥ अग्निः तद्गतः अध्यात्मगतो हरिश्च पूर्वेभिः पूर्वैः अतीतैः॥ बहुलं छंदसीति भिस
ऐस्त्वाभावः॥ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव॥ विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वद
तीत्युक्तेः॥ नूतनैः वर्त्तमानैः सर्वैः ऋषिभिः विशिष्टज्ञानवत्वादृषिनामकैः देवादिभिः ईड्यः स्तुत्यः॥ ऋषज्ञान इत्यस्मात् कि
प्रत्ययः॥ स्तुतश्च सः अग्निः इह बाह्ययज्ञे देवान् आवक्षति आनयेत्॥ बाह्ययज्ञे च इंद्रियदेवान् विशेषेणोपकारिणः क
रोति॥ अद्यपर्यायात् तुदादेस्त्वप्रत्ययात् सायंचिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् चेति ष्ट्युत्प्रत्यये तस्य तुडागमे च युवोरनाका

अध्यात्म

वित्यनादेशो नूतनैरिति रूपं॥ वह प्रापणे इत्यस्माल्लिङर्थे लेडिति लेटि तस्य तिपि लेटोऽडाटावित्यडागमे सिब्बहुलं लेटीति सिप्प्र
त्यये होढ इति हस्य ढत्वे षढोः कः सीति ढस्य कत्वे इण्कोरिति सस्य षत्वे कषयोगे क्षः इति वक्षतीति रूपं॥ आङो व्यवहितश्चेति सूत्रेण
क्रियान्वयः॥ दीर्घादटि समानपदे इति देवान् इति नकारस्य रुः। अत्रानुनासिकः पूर्वस्य तु वेति रोः पूर्ववर्णस्यानुनासिकः॥ भो
भगो इत्यादिना रोर्यत्वं। लोपः शाकल्यस्येति यलोपः। देवाँ इति सिद्धिः॥ ॥इति द्वितीयाऋक्॥२॥ ॥७॥ ॥ ॥७॥
॥अथ तृतीया॥ अभीष्टदातृत्वेनाग्नेः स्तुतिर्युक्तेति भावेनात्राग्नेरभीष्टदातृत्वमुच्यते॥ एवं स्तुतोऽग्निर्नैवेत्यन्वेति॥ स्तोता अग्नि
नैव अग्निनामकयोः प्रसादेनैव रयिं बाह्यं धनाख्यं अध्यात्मं ज्ञानाख्यं वित्तं अश्नवत् आप्नोति॥ प्राप्तस्य वित्तस्य दिवेदिवे दि

॥अग्निः पूर्वेभिरृषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥२॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे॥ यशसं वीरवत्तमं॥
॥अग्निः। पूर्वेभिः। ऋषिऽभिः। ईड्यः। नूतनैः। उत। सः। देवान्। आ। इह। वक्षति॥ अग्निना। रयिं। अश्नवत्। पो
॥षं। एव। दिवेऽदिवे। यशसं। वीरवत्ऽतमं॥३॥

वसे दिवसे। नित्यमितियावत्॥ पोषमेव पुष्टिमेव अश्नवत् आप्नोति॥ नतु लौकिकवत् हीनमित्यर्थः॥ वीरवत्तमं। वीराः पु
त्रा अस्य सन्तीति वीरवत्। अतिशयेन वीरवत् वीरवत्तमं। अतिशयितत्वं योग्यतया वीरे अन्वेति। अतिशयितपुत्रवत् पुत्रवत्तमं।
यशसं यशः कीर्तिं अश्नवत् आप्नोतीत्यर्थः॥ वीरवत्तमं वीरत्वं भावप्रधानं कृत्वा वीर्यवत्तमं यशो ज्ञानं सुखं चाश्नवदित्य
ध्यात्ममर्थो ज्ञेयः॥ अशू व्याप्तावित्यतो व्यत्ययो बहुलमिति लङर्थे लेटि परस्मैपदे च सति स्वादिभ्यः श्नुरिति श्नुप्रत्यये लेटोऽ
डाटावित्यडागमे बहुलग्रहणात् सिब्भावे सार्वधातुकार्धधातुकयोरिति गुणे अवादेशे तिप इकारलोपे अश्नवदिति रू
पं॥ यशसमिति यशःशब्दादमो लुक्॥ पुंल्लिंगत्वं छांदसं॥ ॥इति तृतीयाऋक्॥३॥ ॥७॥ ॥ ॥ ॥

॥अथ चतुर्थी॥ एवंस्तुते उपपत्तिं तद्वचेनोक्त्वाऽधुना अग्निं स्तौति। हे अग्ने त्वं अध्वरं अध्वनि मार्गे स्थितं विधिमार्गस्थं विहितप्रकारेणानु
ष्ठितं यं यज्ञं बाह्यमांतरं च यज्ञं विश्वतः विश्वस्मिन्काले। सदेतियावत्॥ परितोभवतीति परिभूः असि भवसि। परितोभूत्वा रक्ष
सीतियावत्॥ ततोन्यत्रापि दृश्यत इति परियोगे द्वितीया॥ सइत् स एव यज्ञो देवेषु गच्छति देवानाप्नोति। परमेश्वररक्षितमेव य
ज्ञं देवाः स्वीकुर्वंति॥ तादृशस्यैव ज्ञानारव्ययज्ञस्य देवादिकं विषयीभवतीत्यध्यात्ममभिप्रायोध्येयः॥ ॥इति चतुर्थी॥४॥ ॥
॥अथ पंचमी॥ होताप्रागुक्तदिशा होतृप्रेरकतया विशिष्यहोतरि स्थित तेन होते त्युक्तः। कविक्रतुः कवि हेसर्वविषयकज्ञा
नाय क्रतुः प्रज्ञा यस्य सः कविक्रतुः। सत्यः सद्भिर्गुणैः तततः यः नियामकः। सच्चासौ यश्चेति सत्यः॥ सद्भावे साधुभावे च सत्

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि॥ स इद्देवेषु गच्छति॥४॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः॥ देवो देवेभिरा ग
मत्॥५॥ ॥वर्गः॥१॥ ॥अग्ने। यं। यज्ञं। अध्वरं। विश्वतः। परिऽभूः। असि। सः। इत्। देवेषु। गच्छति॥ अग्निः।
होता। कविऽक्रतुः। सत्यः। चित्रश्रवःऽतमः। देवः। देवेभिः। आ। गमत्॥ ॥१॥ ॥

छब्दः पार्थ्येयुज्यत इत्युक्तेः सच्छब्दो गुणवाची। तनु विस्तार इति धातोः क्विप्प्रत्यये तस्य डित्वे च तत् इति व्याप्तवाची। यच्छति निय
मयतीति यमेर्डप्रत्यये टिति अस्यापि टेर्लोपे य इति रूपं॥ साधुगुणव्याप्तो नियंता चेत्यर्थः॥ चित्रश्रवस्तमः। चित्रं अद्भुतं श्र
वः कीर्तिर्यस्यासौ चित्रश्रवाः। अतिशयेन चित्रश्रवाः चित्रश्रवस्तमः। अग्र्यकीर्तीनां पुंसां मध्ये उत्तम इतियावत्॥ देवः क्री
डाविजयादिकर्ता स्तुतिविषयश्चेति पूर्ववदर्थो ज्ञेयः॥ एवंभूतोऽग्निः देवेभिः देवैः यज्ञभाग्विबुधैः अध्यात्ममिंद्रियाभि
मानिभिश्च आगमत्। सार्वकालिको लुङ्। आगंता भवति॥ यज्ञस्थानं भक्तशरीरं वाप्नोति॥ एवंभूतो भगवान् भक्तानां
बाह्याध्यात्मिकपूजास्वीकारतत्परः सन् तत्र विशेषतः संनिहितो भवतीत्यर्थः॥ ॥५॥ ॥इत्यग्निसूक्ते प्रथमो वर्गः॥१॥

हे अग्ने इत्यनुवृत्तिः॥ अध्वराणां यज्ञानां राजंतं राजानं। राजृ दीप्तावित्यस्मादौणादिके झच्‌प्रत्यये झोंत इत्यंतादेशे च रा
जंतमिति रूपसिद्धिः॥ बाह्याध्यात्मिकाध्वरेषां। ऋतस्य यथार्थज्ञानस्य गोपां गोप्तारं रक्षकं॥ गुपू रक्षण इत्यस्मादाकार प्रत्ययः॥
स्वेदमे स्वसमनि स्वर्गादौ हृदये च। दी। दिदिवं। देदीप्यमानं। द्युत्यर्थात् दीव्यतेः धातोरेकाचो हलादेः क्रियासमभिहारे यङि तिय
ह प्रत्यये सन्यङोरिति द्विर्वचने हलादिशेषे यङोचि चेति यङो लुकि तस्मादिकार प्रत्यये दीर्घोऽकित इत्यभ्यासस्य ईकारे दीदिवि
मिति सिद्धिः॥ वर्धमानं। सार्वकालिकः शानच्‌ चूर्द्धौ दसः। ताच्छील्य वयोवचन शक्तिषु चानश् इति ताच्छील्यार्थकश्चानश्‌। आनेमुक्
+रूप+पुगंतेति गुणः॥ सदापूर्णं हालुपमसीत्यनुवर्त्यं योज्यं॥ ॥२॥३॥ हे अग्ने। सः एवमस्माभिः शरणं प्राप्तः त्वं नः अस्माकं पिते

राजंतमध्वराणां गोपामृतस्य दीदिविं॥ वर्धमानं स्वे दमे॥ स नः पितेव सूनवेऽग्ने सूपायनो भव॥ सचस्वा नः स्वस्तये॥२॥
राजंतं। अध्वराणां। गोपां। ऋतस्य। दीदिविं। वर्धमानं। स्वे। दमे॥ सः। नः। पिताऽइव। सूनवे। अग्ने। सुउपायनः।
भव। सचस्व। नः। स्वस्तये॥ वर्गः॥२॥ ॥सूक्तं॥ ॥१॥ ॥

सूनवे पुत्राय। पुत्रस्येति यावत्‌। षष्ठ्यर्थे चतुर्थी॥ सूपायनः। सुउप इत्युपसर्गद्वय पूर्वकात्‌ इण् गतावित्यतो अधिकरणे ल्युट्॥
युवोरनाकावित्यनादेशे सार्वधातुकार्धधातुकयोरिति गुणे एचोऽयवायाव इत्ययादेशे सवर्णदीर्घे च सूपायन इति रूपसिद्धिः॥
ल्युट् च इति करणसामर्थ्यात्‌ त्रिलिंगत्वं। शोभनाश्रयो भव॥ किंच त्वं नः अस्मान् स्वस्तये संततसौख्याय सम्यक्‌ त्वत्सायवासे च स्वरक्ष॥
यथा रक्षणेन संततसौख्यादिकं भवति तथा रक्षेति॥ सु पूर्वकस्य सत्तावाचिनो ऽस्तेर्विभक्तिप्रतिरूपकाव्ययत्वं॥ सत्तावाचिनां सौ
ख्यवाचित्वं च सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचिन इति स्मृतिसिद्धं॥ सचतेः सेवार्थकत्वेऽपि इह तद्योगादनेकार्थत्वात्स्यात्तनां
रक्षणार्थत्वं ध्येयं॥ ॥ऋक्॥४॥ ॥वर्ग॥२॥ ॥इति श्री ऋगर्थमंजर्यां आद्यमाग्नेयं सूक्तं॥ ॥१॥ ॥ ॥ ॥ ॥

॥अथद्वितीयमग्निनवर्चैसूक्तं गायत्रीछंदस्कं॥ तत्राद्यस्तृचो वायव्यः। द्वितीयस्तृच ऐंद्रवायवः। तृतीयस्तृचो मैत्रावरुणः॥ तत्राद्यत
तृचे प्रथमेयमृक्॥ तत्र वाय्वादिशब्दो महायोगविद्वद्रूढिभ्यां विष्णोपरममुख्यः। वाय्वादिप्रसिद्धदेवेषु शरीररूपकविन्यस्तगृहीतेरित्य
त्रोक्तदिशा वाय्वादिशब्दः परममुख्यार्थे विष्णुसंबंधनिमित्तकः स अपि तीरे गंगादिशब्द इव न लाक्षणिकः। अपितु कल्पनोपदेशा
न्मध्वादिवदविरोध इत्यत्रोक्तदिशा निघंटुव्याकरणादिभिर्मुख्यवृत्तिरेव। तथा च परममुख्यमुख्यवृत्तिभ्यां विष्णुतदितरयोर्द्वयोर
पि प्रतिपत्तिर्मंत्रेन विरुध्यत इत्यवोचाम॥ योगो नाम अवयवशक्त्या अर्थप्रत्यायकत्वं॥ तथा चास्य मवयवार्थः। वशब्दो बलवाची प्र
सिद्धः। एतीत्यायुः। इण् गतावित्यतः औणादिके उण्प्रत्यये अचो ञ्णितीति वृद्धौ आयादेशे आयुरिति रूपसिद्धेः॥ वश्चासौ ब
लरूपश्चासौ आयुश्च गमनकर्त्ता चेति वायुरिति वा। वाति गच्छतीति वः। वा गतिगंधनयोरित्यतः कप्रत्यये आतो लोप इटि चेत्या

वायवायाहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधी हवं॥१॥
वायो इति। आ। याहि। दर्शत। इमे। सोमाः। अरंऽकृताः। तेषां। पाहि। श्रुधि। हवं॥

कारलोपे व इति सिद्धेः॥ लोकस्य प्राणधारणहेतुत्वादायुः। इण्भ्शंदसीति इण उण्प्रत्यये णित्वात्वृद्धौ च आयुरिति रूपसि
द्धेः॥ वश्चासावायुश्चेति वा। वाति जानातीति वा। वा लेगत्यर्थत्वेन ज्ञानार्थत्वात्॥ उण् इत्यनेन वातेः
कर्त्तर्युण्प्रत्यये आतो युक् चिण्कृतोरिति वातेः परतः युगागमे वायुरिति सिद्धेः॥ वृणोति व्रियत इति वा वायुः। वृञ् वरण
इति धातोः कर्त्तरि कर्मणि वा उ युप्रत्यये टिलोपे च वायुरिति सिद्धेः॥ ॥हे वायो दर्शत। दर्शनं ज्ञानं नं तत तत। सर्वज्ञेति याव
त्॥ दृशिर् प्रेक्षण इत्य[illegible]सा च घ प्रत्यये पुगं ते ति गुणे दर्शेति रूपं। तनोतेः कर्मणि उप्रत्यये टिलोपे च तेति रूपं॥ हे वायो
अध्यात्मं बाह्यं च यज्ञं प्रति आयाहि आगच्छ। कस्मादागमनं प्रार्थ्यत इति चेत्॥ इमे सोमाः अरंकृताः। अध्यात्मं मनोवृत्त

योभक्त्यादिभिरलंकृताः। बाह्ययज्ञेच 'इमे' प्रसिद्धाः सोमाः 'हिरण्येनालंकृताः संति॥ सोमानांमनसांच स्वेद्रूपेकदैवत्यत्वा
त्सोमपदेनमनोग्रहणंज्ञेयं॥ एवमग्रेपि। तेषां। द्वितीयार्थेषष्ठी। व्यत्ययोभेदकरणस्वातंत्र्यइत्यादेरिहव्यत्ययःस्वातंत्र्ये। वे
दीयानेवसोमान्मनोवृत्तीर्वा 'पाहि' पिब॥ पापाने। पिबादेशाभावश्छांदसः॥ हवं 'हवाह्वानं' 'श्रुधि' शृणुच। आगमनेनसफ
लंकुर्वित्यर्थः॥ हवे ह्वञाह्वदइतिधातोः भावेनुपसर्गस्येतिभावेअकारप्रत्ययेवकारस्यसंप्रसारणेनाकारेसंप्रसारणाच्चेतिपूर्वरूपे
सार्वधातुकार्धधातुकयोरितिगुणेअवादेशेहवेतिरूपसिद्धेः॥ श्रुधि। शृणु। श्रुशृणुपृकृवृभ्यश्छंदसीतिहेर्धिरादेशोविकरणाभाव
श्चज्ञेयः॥ संहितायांदैर्घ्यंउक्तस्यार्थस्याधिक्यज्ञापनार्थं॥ उक्तंच। संहितायांयद्दैर्घ्यंपदकालेनविद्यते। उक्तार्थस्यमहा
धिक्यंश्रुतेःस्वरविवर्जितमिति॥ मनोवृत्तीनांपानंनामप्रीतियुक्तत्वं। बाह्यसोमानांपानंनाम अप्राकृतदिव्यदेहेंद्रिययुक्ततयागु
हाधिकरणोक्तन्यायेनसारभोक्तृत्वंभगवतोज्ञेयं॥ अहंहिसर्वयज्ञानांभोक्ताचेत्यादेः॥ एतेन श्रुध्विति प्रार्थनापिसमाहि
ता। दिव्यश्रोत्रादींद्रियवत्तात्तस्येति॥ नन्वत्रवायुरूपजीवे उत्क्रांतिगत्यागतीनामित्यधिकरणोक्तन्यायेनअणोआगतियो
ग्यत्वेनागतिप्रार्थनायाःसंभवेपिहरावपरिच्छिन्नेक्रियावत्वमेवायुक्तं। नहिव्याप्तेगगनादौक्रियोपलभ्यते॥ नचवाय्वंत
र्यामिणःक्रियावत्वंयुक्तं। एषमआत्मांतर्हृदयेज्यायान्पृथिव्याइत्यादिश्रुत्याअंतर्यामिणोपिव्यापकत्वात्॥ नचन्यायमतेव्या
पृजीवानामिवदेहद्वाराआगतिर्युक्तेतिवाच्यं॥ तद्रीतेरेवदुष्टत्वात्॥ हरेर्देहेनभेदाभावेनअरूपवदेवहीत्यधिकरणोक्तदिशा
तदभिन्नदेहस्यापिव्यापकत्वादितिचेत्॥ मैवं॥ अक्षरमंबरांतधृतेरितिनयेअन्यभावव्यावृत्तेश्चेतिसूत्रेहरेरणुत्वस्याप्युक्तत्वात्।
गमनागमनक्रियावत्वेमहत्वाभावस्यवा महत्वसमानाधिकरणाणुत्वस्यवागौरवेणाप्रयोजकतयाअणुत्वमात्रस्यैवप्रयो
जकत्वेनमहत्वस्यशक्त्यात्मकतादृशायामणुत्वस्यव्यक्त्यात्मकत्वेनतत्प्रयुक्तगत्यादेनपिसंभवेनहरावागतिप्रार्थनस्यापि
संभवात्॥ एवमग्रेपि॥ ॥१॥ ॥

॥अथ द्वितीया॥ हे वायो। सुतः सोमा यैस्ते सुतसोमाः। अच्छेति निपातो अभीत्यर्थे अहर्विद इत्यत्रान्वेति॥ अच्छाहर्विदः। अहरिति य
स्मिन्दिने सोमाभिषवस्तद्दिनमुच्यते। यज्ञोपलक्षणमेतत्॥ अच्छ अभितः अहर्विदः यथावद्यज्ञवेदिनः। जरितारः स्तोतारः उ
क्थेभिः उक्थैः शास्त्रैः त्वां जरंते स्तुवंति॥ ॥२॥ ॥अथ तृतीया॥ हे वायो तव द्वितीयार्थे षष्ठी। त्वां। प्रपृंचती। पृची संपर्के। त्वां सं
स्पृशंती। त्वद्विषयिणीतियावत्॥ अत एव उरूची अतिमहती धेना वाक्। सोमपीतये सोमस्य पीतिः पानं यस्य सः सोमपीति
स्तस्मै दाशुषे यजमानाय। जिगाति। गत्यर्थोयं धातुः अंतर्णीतणिजर्थः॥ जिगाति प्रापयतीत्यर्थः॥ ईप्सितमिति शेषः॥ तव स्तुति

वायवुक्थेभिर्जरंते त्वामच्छा जरितारः। सुतसोमा अहर्विदः॥१॥२॥ वायो तव प्रपृंचती धेना जिगाति दाशुषे।
उरूची सोमपीतये॥१॥३॥ ॥इंद्रवायू इमे सुता उप प्रयोभिरागतं। इंदवो वामुशंति हि॥२॥१॥ ॥ ॥
वायो इति। उक्थेभिः। जरंते। त्वां। अच्छ। जरितारः। सुतऽसोमाः। अहःऽविदः॥ ॥वायो इति। तव। प्रपृंचती। धेना।
जिगाति। दाशुषे। उरूची। सोमऽपीतये॥ ॥इंद्रवायू इति। इमे। सुताः। उप। प्रयःऽभिः। आ। गतं। इंदवः। वां। उशंति। हि॥

यजमानाभीप्सितप्रापिका। अतस्तु वतामस्माकमभीष्टं कुर्विति भावः॥ ॥इत्याद्यतृचः॥ ॥द्वितीयतृचे यमाद्यातृक्॥ अत्र
वायुशब्दनिरुक्तिः प्राग्वत्॥ इदि परमैश्वर्ये इत्यस्मात् ऋज्रेंद्राग्रवज्र इत्यादिना औणादिके रन् प्रत्यये उपपदे इंद्रशब्दस्य इमादेशो
च इंद्र इति सिद्धेः। इदं सर्वं पश्यतीति इंद्र इति वा। इदंशब्दोपपदात् दृशेर्डु प्रत्यये इदंशब्दस्य इमित्यादेशो + इदितो नुम् धातोरिति नुमा
गमे सति इंद्र इति वा। इदं विषयजातमुद्दिश्य द्रवति सर्वं विषयान् अनुभुंक्त इति इंद्र इति वा। इदंशब्दोपपदात् द्रु गताविति धातो
र्डु प्रत्यये + सति इंद्र इति सिद्धेः॥ इदमदर्शमिति इः तस्मादिंद्रो नाम इदंद्रो ह वै नाम तमिदंद्रं संतं इंद्र इत्याचक्षते परोक्षेणेत्यैत
रेयश्रुतेः॥ इंधो ह वै नाम योयं दक्षिणेक्षन्पुरुषस्तमिंधं संतमित्याचक्षते परोक्षेणेति काण्वश्रुतेर्दीप्तिमत्वादिंद्र इति वा। इंधीदीप्ता

विस्तोरप्रत्यये धस्य दकारादेशे च सति इंद्र इति सिद्धेः ॥ इदमभीष्टं राति ददातीति वा इंद्र इति ध्येयं ॥ रादान इत्यतः कप्रत्यये आतो लो
प इति चेत्साकारलोपे इदमभ्रैं दादेशे च सति इंद्र इति सिद्धेः ॥ हे इंद्रवायू इमे सुताः सोमाः संपादिताः संति । ते च इंदवः सोमाः ॥ अ
भिमानिनयन्मायेन बाह्ययज्ञे सोमाभिमानिनो देवाः । अध्यात्मं मनोवृत्त्यभिमानिनः । हि यस्मात् वां युवां उशंति इच्छंति । वश
कांतौ । युवयोरागमनं कामयंते । तेन कारणेन प्रयोभिः प्रियतमैः । सहेत्यर्थः । ईयसुन्प्रत्यये ईकारस्याकारश्छांदसः ॥ त
थाच प्रियशब्दात् ईयसुन्प्रत्यये प्रियस्थिरेत्यादिना प्रियशब्दस्य प्रादेशे प्र ईयस् इति स्थिते ईकारस्य छांदसे अकारे अतो गुण इति
पररूपत्वे च प्रयोभिरिति रूपं । उपागतं उपागच्छतं ॥ व्यवहिताश्चेत्युपसर्गान्वयः ॥ गमेः इषुगमियमां छ इति मकारस्य छादेशाभावः
छांदसः ॥ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो अनुनासिकलोपः ॥ अत्रेंद्रवायुपदाभ्यां प्रसिद्धेंद्रवा
य्वंतर्गतावुपेंद्रसंकर्षणौ गृह्येते ॥ भगवद्रूपयोर्भेदस्य नस्थानतोपि हि परस्योभयलिंगं सर्वत्र हीति भक्तिपादीयाष्टमेऽधिकर
णे निषिद्धत्वेन भेदाविनाभूतद्वित्वस्यैकत्ववति भगवत्ययोगेन द्विवचनायोगेपि अधिष्ठानभूतयोरिंद्रवाय्वोर्द्वित्वात् द्विवचनं यु
क्तं ॥ यद्वा पूर्वतंत्रे नवमे अधिपतित्वं स्वामिदेवतारूपं समवायादिति तृतीयपादीयद्वादशेऽधिकरणे मेधपतये मेधं मेधपतिभ्यां
मेधमित्यत्र अग्नीषोमीयपशौ अधिकप्रथमे मेधपतिशब्दार्थयोरग्नीषोमीययोरेकवचननिर्वाहाय देवतात्वेनैकत्वं । देवतात्वस्य
व्यासक्तत्वात् ॥ द्विवचननिर्वाहाय तु देवताधिष्ठानतत्स्वरूपेण द्वित्वमिति द्वित्वैकत्वयोः समुच्चय उक्तः तथा इहापि हरेः स्वरूपेणै
कत्वं रूपविशेषेण द्वित्वमिति द्वित्वैकत्वयोः समुच्चयोस्तु । इंद्रो मायाभिः पुरुरूप ईयते । यदेकमव्यक्तमनंतरूपं । एकं रूपं बहुधा यः
करोति । पश्यमे पार्थरूपाणि शतशोऽथ सहस्रशः इत्यादिश्रुतिस्मृतिभिरेव समुच्चयावगतेः ॥ गुहां प्रविष्टावात्मानौ हि तद्दर्श
नादिति सूत्रकृतापि ऋतं पिबंताविति श्रुतिगतद्विवचनस्यात्मांतरात्मारव्यरूपद्वयाभिप्रायेण निर्वाहो कृतश्च ॥ उक्तं हि तद्व्या
ख्याने द्वित्वं चैकस्य युज्यत इति ॥ किंच ऐतरेये अथ देवरथ इत्यादिना तदयं प्राणोऽधितिष्ठतीत्यंतेन वाक्येनोक्तः प्राणस्तथेति
पादांत्यप्राणानये विष्णुपरतया निर्णीतिकवचनांतप्राणशब्दार्थस्य देहारव्यरथाधिष्ठातृत्वरूपेण संमतित्वेन तदुक्तमृषिणात्व

दोहृतयोः आतेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना। यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः
+पनिषदुक्तं निमिषश्चिज्जवीयसा रथेनायातमश्विना। अंतिषद्भूतु वामवइतिमं त्रयोरेकस्यैव विष्णोः रूपद्वयाभिप्रायेण द्विवचनं
तत्राव्दवाच्यमहो केश्च ॥ भेदाभावेपि भेदकार्यं निर्वाहकेण भेदं प्रति निधिनास्वरूपसामर्थ्येशाद्धितेन विशेषेण द्विसर्वसंख्यापपत्ते
श्च। तदुक्तं। विशेषाद्द्विवचनविषयाभ्यामुभाभ्यामिति ॥ सोमवत्सोमभृत्यानामपिकेषांचित्सोमरश्मिगततया सोमभृत्यतया
च सोमशब्दवाच्यानां सोमरसानां मनसां च देवतात्वादिदं वइति बहुवचनोपपत्तिः ॥ सोमानां मनसां चैव देवताः सोमरश्मिगाः।
सोमभृत्याः समस्तस्य सोम एवाधिपो हरिरिति ॥ ॥२।१॥ ॥ अथ द्वितीया ॥ हे वायो 'वाजिनीवसू। वाजमन्नं 'तदेव वाजि।
तनीयातिशयइत्युक्तेरकारस्येकारः। वाजं नयतीति वाजिनीः सूर्यः। सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजीनीराजामुपसर्गेपि क्वि

वायविंद्रश्च चेतथः सुतानां वाजिनीवसू। तावायातमुपद्रवत् ॥२।२॥ ॥

वायो इति। इंद्रः। च। चेतथः। सुतानां। वाजिनीवसू इति वाजिनीऽवसू। तौ। आ। यातं। उप। द्रवत् ॥ वर्गः ॥३॥

बिति क्किप्। स हि वर्षादिना अन्नं प्रवर्त्तयति। तत्र वसत इति वाजिनीवसू। वसतेरुः ॥ अन्नपती सूर्ये सर्वदा स्थितौ। इंद्रश्च 'चकारा
त्त्वं च 'सुतानां सुतान् मनोवृत्तीर्वा। व्यत्ययो बहुलमित्युक्तेः। चेतथः। चिती संज्ञाने। विजानीथः ॥ अस्मत्स्वीकरणयोग्या इ
ति विजानीथ इति यावत् ॥ चेतथः चेततः जानतो युष्मदस्मद्भ्यां निनो यजमानस्य सुतान् प्रतीति वा ॥ द्रवत् द्रुतं। तौ युवां।
उपायातं उपागच्छतं। वायवायाहि उपश्रयोभिरागतं 'तावायातमिति पुनरुक्तिस्तात्पर्यज्ञापनार्था ॥ ॥ इति द्वितीया ॥ ॥
॥ अथ तृतीया ॥ हे वायो 'नरा' नरौ। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालइति द्विवचनस्य आत् इत्ययमादेशः ॥ लाप
रिवर्त्तन इत्यतो न अपूर्वात्कृप्रत्यये रलयोरभेदान्नरेतिरूपं हान्निर्विकारा इत्यर्थः ॥ अविनाशिनो वा। रीङ् क्षय इत्यतो रिषहिं
सायामित्यतो वा न अपूर्वात् डः। नलोपाभावश्छांदसः। युवां इंद्रश्च त्वं च 'सुन्वतः' यजतः 'निष्कृतं' तत्कृतप्रजानुसारिफलदानं

श्री राम
६

अथ द्वितीया॥ ऋतावृधौ। ऋतं अनुगतं सर्वं कालमिति ऋतशब्दो ऽनित्यपर्यायः। वृधु वर्धने इति धातोः इगुपधलक्षणः किरः क इति कप्रत्यये क्ङिति चेति गुणाभावे वृधेति रूपसिद्धेः। ऋतवृधौ नित्यवृद्धावित्यर्थः॥ ऋतेन। भावप्रधानं। ऋतत्वेन सत्यत्वेन। न तु पचारत इतियावत्॥ ऋतस्पृशा। ऋतशब्दो ऽयथार्थ वा ऽऽदिवाची। ऋतं वेदं स्पृशत इति ऋतस्पृशौ। स्पृशानुदके क्विन् इति स्पृशधातोः क्विन्प्रत्यये ऋतस्पृगिति रूपं। वेदप्रतिपाद्याविति यावत्॥ मित्रावरुणौ। मित्रश्च वरुणश्च मित्रावरुणौ। देवताद्वंद्वे चेति पूर्वपदस्य दीर्घः। मित्रावरुणशब्दितौ भगवद्रूपविशेषौ। बृहंतं महांतं क्रतुं ज्ञानं सुखं वा। आशाथे ईशाथे। ईशऐश्वर्ये। ऐश्वरयत इतियावत्॥ ईशाथ इति वक्तव्ये ईकारस्य तृतीयो ऽतिशयइत्याकारः। व्युत्क्रमेण आकारस्य ईकारापेक्षया तृतीयत्वात्॥ अधीगर्थदयेशां कर्मणीति षष्ठी क्रतुशब्दे छांदसत्वान्न कृता॥ प्रसिद्ध मित्रावरुणपक्षे तु ऋतवृधावित्यादौ ऋतशब्दः ऋतः सर्वगत

ऋतेन मित्रावरुणावृतावृधावृतस्पृशा। क्रतुं बृहंतमाशाथे॥२॥ कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसं॥३॥ ॥सूक्तं॥२॥ ॥ऋतेन। मित्रावरुणौ। ऋतऽवृधौ। ऋतऽस्पृशा। क्रतुं। बृहंतं। आशाथे इति॥२॥ कवी इति। नः। मित्रावरुणा। तुविऽजातौ। उरुऽक्षया। दक्षं। दधाते इति। अपसं॥ ॥वर्ग ४॥ ॥सूक्तं॥२॥

इति विष्णुपरः। ऋतेन भगवता वृधौ। ऋतस्पृशौ भगवत्संबंधिनौ। ऋतेनेत्यस्यानित्यपर्यायत्वेनात्र विवक्षया सदेत्यर्थः॥ शिष्टं प्राग्वत्॥ अत्र संहितायां दैर्घ्यमुक्तार्थस्यावधारणार्थं। एवमन्यत्रापि। उक्तं हि। संहितायां तु दैर्घ्यादि तु क्वाधिक्ये अनन्यार्थत्वविज्ञप्त्यै इति॥ ॥२॥ ॥अथ तृतीया॥ कवी सर्वज्ञौ। तुविजातौ तुविवत्वेन पूर्णत्वेन जातौ स्थितौ। तुविना पूर्णेन ब्रह्मणा जाताविति देवतांतरे। उरुक्षया उरुक्षयौ। सुपांसुलुगित्याद्विनाविसर्जके आकारः। क्षयशब्दः स्थानवाची गतिवाची च। क्षिनिवासगत्योः इत्यत एरजित्यधिकरणे अच्प्रत्यये गुणे अयादेशे च क्षयेति सिद्धेः॥ महास्थानौ सर्वगताविति यावत्। नित्यगतिमंताविति वा। मित्रावरुणौ भगवद्रूपविशेषौ प्रसिद्धमित्रावरुणौ देवौ वा नः अस्मदर्थे दक्षं यजमानं प्रति अपसं कर्म दधाते कुर्वाते। यजमानकर्मकर्तारं कुर्वात इति यावत्॥ अपशब्दः कर्मवाची ऽस्ति बश्च। छांदसत्वात्स्वमोर्नकादित्यमोलुङ्न भवति। यद्वा नः अस्मदीयं अपसं। अ

न्यो आदिभ्यो ऽजित्यच्प्रत्ययेः॥ कर्मकर्तारं दक्षं समर्थं दधाते कुर्वाते॥ ऋत्यांयज्ञे नियुक्तानो ऋत्विग्वाच्यतयान इति ऋत्विजामुक्तिध्येया॥ ॥इति ऋगर्थमंजर्यां द्वितीयं सूक्तं॥ ॥२॥ ॥ ॥ ॥अथ तृतीयं द्वादशर्चं सूक्तं॥ तत्राद्य तृचं आश्विनः। द्वितीय ऐंद्रः। तृतीयो वैश्वदेवः। चतुर्थः सारस्वतः॥ तत्राद्यतृचे प्रथमेयमृक्॥ हे द्रवत्पाणी। द्रवंतौ पाणी ययोस्तौ द्रवत्पाणी क्षिप्रहस्तौ औदार्यवंताविति यावत्॥ शीघ्रप्रदाविति वा। शुभस्पती शुभाधिपौ। पारस्करादित्वात्सुडागमः॥ यद्यप्यध्यापकाः शुभःपती इति पदद्वयं वदंति। तदनुसारेण शुभ दीप्तावित्यतो संपदादिलक्षणे भावे क्विपि तदं[illegible]कं वचनेषष्ठ्याः पतिपुत्रेत्यादिनाविसर्जनीयस्य प्रसक्त समित्य भिप्रेत्य शुभः शोभनस्य कर्मणः पती पालकाविति यास्कभाष्ये व्याख्यातं। तथापि नायमस्ति नियमो यच्छाकल्यदृष्टपदविभागेनैव व्याख्यातृभिर्व्याख्यातव्यमिति॥ अतएव अरुणामासकृद्दृक इत्यत्र शाकल्येनमतिसकृद्दिति च द्वेधा

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती। पुरुभुजा चनस्यतं॥१॥
अश्विना। यज्वरीः। इषः। द्रवत्पाणी इति द्रवत्ऽपाणी। शुभः। पती इति। पुरुऽभुजा। चनस्यतं॥

विभक्तमपि यास्केन मासानां चार्धमासानां च कर्ता चंद्रमाः मासकृदित्यर्थांतरविवक्षया एकपद्यमंगीकृत्य व्याख्यातं। नथा वाचाविरूपनित्यये त्यत्र विरूपनित्ययेति द्वेधा पठितमपि विरूपनित्ययेत्येतत् विरूपतया कर्त्रहितत्वया नित्ययत्येवं व्याख्यानिरूपनित्यये त्यत्र विरूपनित्ययेति द्वेधा पठितमपि विरूपनित्ययेत्येतत् विरूपतयाकर्त्ररहिततया नित्ययत्येवं व्याख्यातं। एवं शुभस्पती इति तदपि एकपदमंगीकृत्य टीकाकाराः पारस्करादिलक्षणं स्फुटं ब्रुवंतीपदन्नित्यदोषः॥ पुरुभुजा। पुरुभुजौ। बहु भुजौ। बहौ भोग पालकाविति वा॥ भुज पालनाभ्यवहारयोरिति। सुपांसुलुक्पूर्वसवर्णेत्याकारादेशः। पुरुः बहोः वित्तस्य भुजो ऽस्मापालको। बहोः भोगदाताराविति वा॥ भुजपालनाभ्यवहारयोरि जो। सुपांसुलुक्पूर्वसवर्णेत्याकारादेशः। पुरोः बहोः वित्तस्य भुजौ ऽस्मारौ। बहो [illegible]दाताराविति वा॥ भुजपालनाभ्यवहारयोरि स्तु भयार्थो क्विप्॥ हे अश्विना अश्विनौ। आशुगतिमत्वात्शीघ्रावगतिमत्वाद्वा अश्विपदवाच्यौ भगवद्रूपविशेषौ प्रसिद्धदेवौ वा। सुवामितियोग्यतया अन्वेति॥ यज्वरीः यज्ञसाधनानीतियावत्। यजतेः करणे वरट्प्रत्यये टिड्ढाण ञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप इत्यादिना ङीपि। यज्वन्+सति चेवं यज्वरीति रूपं। न च सुयजोर्ङ्वनिबिति यजतेर्वनिपृप्रत्ययः। यस्यातिचेति रेफस्याकारलोपः॥+ या[illegible]यानि। यज्ञ+सति चेवं यज्वरीति रूपं। न च सुयजोर्वनिबिति यजतेर्वनिपृप्रत्यय वनो र चेति ङीपि तत्संनियोगेन नेफादेशे च यज्वरीति रूपं संभवतीति वाच्यं। वनिपः कर्तर्येनुशिष्टत्वेन अन्नानां यज्ञकर्तृत्वा

नुपपत्तेः॥ असिध्धिनत्तीतिवत्स्वव्याप्यकर्तृत्वविवक्षेतितु अगतिकागतिः॥ तस्मादरङ्प्रत्ययवसुसादनंयुक्तं॥ इषः अन्नानि। हवीं
षीतियावत्॥ चनस्यतं प्रयच्छतं। यद्वायज्वरीः यज्ञेकृतानइषः स्वभागान्स्वीकुरुतमित्यर्थः॥ चीयरअरस्वश्चेतिचीञ्प्रजानिवा
मनयोरित्यतोऽसुन्प्रत्यये आकारस्य ह्रस्वेच अनुकूष्टेनुगागमेचलोपोव्योर्वलीतिय लोपेनिष्पन्नात्स्वनःशब्दात्सुप आत्मनः
क्यजितिछंदस्यात्परेच्छायामपिक्यचिसनाद्यंततयाधातुत्वाल्लोउमध्यमद्विवचनेचनस्यतइतिरूपं॥ आशुपदोपपदात्ववगतिगं
धनयोरित्यस्मादिनिप्रत्ययः। आतोधातोरितिवातेराकारलोपः। आशुपदेआकारस्यह्रस्वः। उवर्णलोपश्च॥ प्रसिध्धाश्विपक्षेऽश्वि
नूपात्स्त्र्यांजातत्वादश्विनावितिध्येयं॥ अश्विशब्दादपत्यार्थेतश्चिताइतिसूत्रेणइनिप्रत्ययेयस्येतिचेत्यकारलोपेअश्वीतिरूप
सिध्दिः॥ तदुक्तंहरिवंशे। ददर्शयोगमास्थायस्वभार्यांवडवांततइति॥ ॥१॥ ॥अथद्वितीया। पुरुवहुदंसःकर्मययोस्तौपु

अश्विनापुरुदंससानराशवीरयाधिया। धिष्ण्यावनतंगिरः॥२॥
अश्विना। पुरुऽदंससा। नरा। शवीरया। धिया। धिष्ण्या। वनतं। गिरः॥ ॥२॥ ॥

रुदंससौ। द्विवचनस्याकारादेशश्छांदसः॥ बहुकर्मकृताविन्यर्थः॥ नरानरौ निर्विकारौ अविनाशिनाविति। वायविंद्रश्चसुन्व
तइत्यस्यांऋचिव्याख्यातमेतत्पदं॥ धिष्ण्या धिष्ण्यौ सदासर्वाश्रयौ। धिष्ण्यमोको निवसनमित्यसंनिधानात्। अश्विना अश्वि
नौ युवां शवीरया शंसुखंवीरंवीर्यं सुखवीर्यात्मिकया धिया गिरः अस्मदीयाः स्तुतिरूपाःवाचः। वनतं संभजतं। वन
संभक्ताविति धातोः स्वीकुरुतमितियावत्॥ ॥२॥ ॥अथतृतीया॥ रुद्रवर्तनी। रुजंरोगादिद्रुःखंद्रावयतीतिरुत्संसार
द्रावकः। तंस्तेहतोभक्तत्वाद्वा अनुवर्त्तनात्तयथाक्रमंभगवद्रूपविशेषौप्रसिध्धाश्विनौचरुद्रवर्त्तनीनाद्वौ। नासत्यौ नविद्यं
तेअसत्याःअसद्गुणाःययोस्तौनासत्यौ। सद्गुणवंताविन्यर्थः। प्रसिध्धदेवौचेन्नासिकाभिमानित्वान्नासिक। संस्थाविन्यर्थः॥ नभ्रा

श्रीराम
८

प्रति। तत्कर्त्तुमितियावत्। इष्टा इच्छंभूतया दूरान्येवास्मै फलमित्येवंभूतयाधिया मक्षु क्षिप्रं उपयातंउपागच्छतं॥ अत्रनरपदोक्ता
विकाराविनाशित्वेविष्णुरूपयोरुपेंद्रसंकर्षणयोरसंभववस्तुसतोनुपपत्तेः नात्यश्रुतेर्नित्यत्वः श्रुतावधइतिनयसिध्धतयामुख्ये॥
प्रसिध्धवायविंद्रयोस्तुगौणे। मुक्तावविनाशित्वादिर्निश्चितत्वात्सागपितयोपचर्यते। मुख्याविनाशित्वेतुतदुपर्यपीत्यादिदेवताधिक
रणविरोधः। तत्रदेवानांस्वस्वपदवीविशिष्टानामाद्यंतवत्त्वोक्तेरितिज्ञेयं॥ ॥इतिद्वितीयस्तृचः॥ ॥अथतृतीयस्तृचोमेत्रावरु
णः। तत्रेयमाद्यानृक्॥ मातिजानातित्रायतइतिमित्रः। रक्षणीयंज्ञात्वारक्षतीत्यर्थः। माङ्माने त्रैङ्पालनइत्याभ्यांउः। पूर्व
स्याकारस्येकारः। वरः उत्कृष्टःणःआनंदोयस्यासौवरुणः। सएववरुणः। णश्चनिर्वृतिवाचकइत्युक्तेर्णशब्दःसुखवाची। वरश
ब्दाकारस्योकारोनिरुक्तत्वात्। पूतदक्षं। पूताःपवित्राःदक्षाःयजमानाःअनेनेतिपूतदक्षस्तं। रिशादसं। रमेभ्योवेङ्प्रत्ययेरीति

वायविंद्रश्चसुन्वतआयातमुपनिष्कृतं। मक्ष्वीत्थाधियानरा॥३॥ मित्रंहुवेपूतदक्षंवरुणंचरिशादसं। धियंघृताचींसाधंता॥
वायोइति। इंद्रः। च। सुन्वतः। आ। यातं। उप। निःऽकृतं। मक्षु। इत्था। धिया। नरा॥३॥ ॥मित्रं। हुवे। पूतऽदक्षं। वरुणं। च। रि
शादसं। धियं। घृताचीं। साधंता॥१॥

रूपं। रिचततत्रांचरिशं सुखसुखं। अतिशयितसुखमितियावत्॥ रिशं अत्ति अनुभवतीति अदेरोणादिकोसुन्प्रत्ययः। रिशाद
सः तंरिशादसं। अतिशयितसुखभोक्तारं मित्रं मित्रदेवतां तदंतर्गतं हरिं च वरुणं वरुणदेवतं तदंतर्यामिणं हरिं च हुवे ह्वयामि
ह्वयतेः संप्रसारणंछांदसं। तेनवकारस्योकारेसंप्रसारणाच्चेतिपूर्वरूपत्वे अचिश्नुधात्वितिउवङ्नादेशोहुवेतिरूपं॥ नचहुश्नु
वोःसार्वधातुकइतियणादेशःस्यादितिवाच्यं॥ लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवग्रहणेनहुश्नुवोरित्यत्रह्वयते + इ+ र्लाक्षणिकत्वे
नग्रहणासंभवात्॥ घृताचीं। घृरक्षणदीप्त्योरित्यतःकर्त्तरिक्तः। घृतोविष्णुस्तमंचतीतिघृताचीं परमात्मविषयिणींधियं सा
धंता साधयंतौ। सुपांसुलुगित्यादिनाद्विवचनस्य आकारादेशः। अंतर्णीतणिच्च। साधयंतौयुवांयतः अतोह्वयामीत्यर्थः॥
॥इतिप्रथमा॥ ॥१॥ ॥ ॥ ॥

णनपादित्यादिना नलोपाभावः॥ दस्रौ सर्वशत्रुभेदकौ। हे अश्विनौ। वृक्तबर्हिषः। वृक्तं विस्तृतं बर्हिर्येन तस्य वृक्तबर्हिषो यजमानस्य
संबंधिनः सुताः सोमाः। युवाकवः युष्मदीयाः। युष्मदर्थं संपादिता इति यावत्। तस्मात् आयातं आगच्छतं॥ उरुशब्दे कर्मण्युपपदे द्रु
गतावित्यस्माद्दंतणीतिपर्यर्थात् उ प्रत्यये टिलोपे पूर्वपदांतस्य उकारे उरुद्रशब्दरूपं। वृतु वर्त्तने इत्यतो भावेनिप्रत्यये पुगंतेति गुणे वर्त्तनि
रितिरूपं। उरुद्रस्य वायोः वर्त्तनिः अनुवृत्तिर्ययोस्तौ रुद्रवर्त्तनी इतिविग्रहः॥ नासत्याविति तस्य आर्थ्येर्थे सत्यशब्दः सद्भावपर्यायत्वात् स
द्भावे साधुभावे चेत्यादेः सद्भाववाची। सत्यानभवतीत्यसत्याः। नविद्यंते असत्याः ययोस्तौ नासत्याविति विग्रहः। द्वितीयेऽर्थे नासाशब्दात्
भवार्थेत्य प्रत्यये पूर्वस्य ह्रस्वे नासत्येतिरूपं॥ दस्र विदेदने इत्यतो र प्रत्यये दस्रेतिज्ञेयं॥ धातूनामनेकार्थत्वाद्वृक्तशब्दो विस्तृतार्थो ध्येयः॥
युवयोरिदमित्यर्थे आकु प्रत्यये युष्मदस्मदो युवादेशो युवाकुरितिरूपं॥ ॥१॥३॥ ॥अथ द्वितीयतृचे प्रथमा॥ चित्रभानो। चित्राः

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः। आयातं रुद्रवर्त्तनी॥१॥३॥ इंद्रायाहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना
पूतासः॥२॥१॥ ॥दस्रा। युवाकवः। सुताः। नासत्या। वृक्तबर्हिषः। आ। यातं। रुद्रवर्त्तनी इति रुद्रऽवर्तनी॥ ॥इंद्र। आ।
याहि। चित्रभानो इति चित्रऽभानो। सुताः। इमे। त्वाऽयवः। अण्वीभिः। तना। पूतासः॥

अद्भुताः। चित्रमालेख्यमित्यभिधानात्। भानवः ज्ञानानि तेजांसि यस्य तस्य संबुद्धिः। हे इंद्र। नितुक्तोयंशब्दः प्राक्। हेवि
छोगाहवर्जितमित्यर्थः॥ अण्वीभिः सूक्ष्माभिः सूक्ष्मतंतुनिर्मिताभिः। पटीभिरितिशेषः। तना। तनु विस्तार इत्यतः क्वा प्रत्ययार्थे ओका
र प्रत्ययः॥ तनिता विस्तृत्येति यावत्। पूतासः पूताः। आज्जसेरसुक्। शोधिताः। इमे सुताः सोमाः सोमरसाः। तदभिमानिन इतिया
वत्। तेषां पूतत्वमभिमन्यमानद्वारेणेति ज्ञेयं। त्वायवः त्वामिच्छवः संति। कदा रसानिंद्र आस्वादयिष्यतीति कामयमानाः संति। युष्म
द्वादिष्वर्थे क्यच् प्रत्यये तदंतस्य सनाद्यंता धातव इति धातुत्वे सुपो लुकि प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशो युष्मदस्मदोरनादेश इ
त्य विभक्तावपि हलादौ छांदसे आविवक्षा छंदसीति क्यचंतात् उ प्रत्यये अतो लोप इति क्यचोऽकारस्य लोपे पि च त्वायव इतिरूपं। तस्मा
त् आयाहि आगच्छ॥ अध्यात्मं। अण्वीभिः सूक्ष्माभिः सूक्ष्मार्थविषयकाभिः। प्रमाभिरितिशेषः। तना विस्तृतत्य पूतासः शोधिताः
निर्मलीकृताः सुताः मनांसि। तदभिमानिन इत्यर्थः। सोमाभिमानिन एव मनोभिमानिन इति प्रागेवावादिषं। त्वायवः संति। तस्मादायाहीति॥१॥

अथ द्वितीया॥ हे इंद्र धिया अस्मद्बुध्या इषितः अधीष्टः। प्रार्थित इतियावत्। यद्वा धिया स्वबुध्या इषितः प्रेरितः। विप्रजूतः विप्रैः ब्राह्म
णैः ऋत्विग्भिः जूतः भक्त्या प्रेरितः तैः वाघतः वाघृ शब्दे। स्तुवतः होतुः ब्रह्माणि स्तुतिवाक्यानि। सुतवतः सोमवतो यजमानस्य।
संहितायां दैर्घ्यमार्धिकमार्षं। सुतवत इत्युक्त्या सोमानिति लभ्यते। होतुः स्तुतिवाक्यानि यजमानसंबंधिसोमांश्च प्रति उपायाहि
उपागच्छेति॥ अध्यात्मं तु। सुतवतो मनस्विनः इच्छारूपमनोवृत्तिमतः। तदागमनमिच्छत इतियावत्॥ मोक्षसाधकस्य यजमा
नस्य सोमान् मनोवृत्तीः प्रति तस्यैव वाघतः मे मे स्तुवतो होतृत्वानदीयस्तुतिवाक्यानि च प्रत्युपायाहीति॥ ॥२॥२॥ ॥
अथ तृतीया॥ हरिवः। भक्तानां जननमरणादिसंसारक्लेशं परिहरन्वर्त्तमान। हृञ् हरणे इत्यतः कर्त्तरि इकारप्रत्यये सार्व
धातुके तिगुणे हरीति सिद्धे वृतु वर्त्तने इत्यतो सुन्प्रत्यये उसेटिलोपे कृदंतत्वेन प्रातिपदिकसुबुत्पत्तौ असस्तं तस्य चाधातो रि

इंद्रा याहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः॥२॥२॥ इंद्रा याहि तूतुजान उप ब्रह्माणि हरिवः। सुते द
।धिष्व नश्चनः॥२॥३॥ ॥इंद्र। आ। याहि। धिया। इषितः। विप्रऽजूतः। सुतऽवतः। उप। ब्रह्माणि। वाघतः॥ ॥
इंद्र। आ। याहि। तूतुजानः। उप। ब्रह्माणि। हरिऽवः। सुते। दधिष्व। नः। चनः॥ ॥वर्गः॥५॥ ॥

तिदीर्घे सस्य रुत्वे विसर्गे च हरिश्चासौ वाश्चेति विग्रहे हरिवा इति रूपसिद्धौ तस्य संबुद्धिः हरिवः। हे इंद्र विष्णो। हरिभिः हरिना
मकैरश्वैर्वर्त्तत इति वा हरिणा विष्णुना प्रेरितो वर्त्तत इति वा हरिवाः तस्य संबुद्धिः। हे इंद्र पुरंदरेति वा। अध्यात्मं तु। विषया
णां हरणात् आहरणात् हवय इंद्रियाणि तेषु वर्त्तत इति हरिव इति ज्ञेयं॥ नः अस्माकं ब्रह्माणि स्तुतिवाक्यानि प्रति तूतुजानः
वेगवान्सन् उपायाहि उपागच्छ। आगत्य च नः सुते अस्मदीये सोमे चनः मनः दधिष्व धत्स्व। कुरु। अस्मदीयं सोमरसं
पातुमिच्छां कुर्विति॥ तुज गतावित्यस्मात् छंदसि भृशार्थे यङ् सन्यङोरिति द्विर्वचनं यङो लुक्। तुजादीनां दीर्घोऽभ्यास
स्येत्यभ्यासस्य दीर्घः॥ युङ् लुगंतात् चानश् प्रत्ययः। तूतुजानः वेगवानिति ज्ञेयं॥ ॥इति द्वितीये तृचे तृतीयाऋक्॥ ॥२॥३॥

॥अथ चतुर्थर्चि प्रथमेयं ऋक्॥ पावका शोधिका। पूञ् पवने इत्यस्माण्वुल्तृचाविति ण्वुल्। अचो ञ्णितीति धातूकारस्य वृध्यावादेशौ। प्रत
सु यस्य कुरीरनाकावित्यकादेशः। स्त्रीत्वादजाद्यतष्टाबिति टाप्। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इति इत्वाभावश्छांदसः॥ वाजिनीवती। वा
जमन्नं। तदेव वाजि। तृतीयो त्रिशये। तन्नयतीति वाजिनीः अन्नपतिः सूर्यः। पुत्रत्वेनास्याः विश्ववारव्याया वाण्याश्चास्तीति वाजिनीव
ती। यद्वा वाजमन्नं सुखं च अन्नवत्वाद्धनं सुखवत्वाच्च वाजिनी वागुच्यते। तदभिमानिन्युमापुत्री तेन विश्वो वाण्याश्च वृत्तेत इति वाजि
नीवती। धियावसुः। धिया सह वसतीति धियावसुः। वसतेरुकारोऽलुक्समासः। नित्यवो धेत्यर्थः॥ सरस्वती। सरो व्याप्तिज्ञानं सुखं। सृग
तावित्यतो भावे असुन्प्रत्यये गतेर्निरुपपदत्वेन व्याप्तिरूपत्वात् गतेर्ज्ञानार्थत्वप्रसिद्धेश्च सरः पदेन व्याप्तिज्ञानयोर्लाभात्। रमेरौणादिकेऽ
सुन्प्रत्यये इत्वे चरइति सुखलाभः। व्याप्त्यादयो गुणा अस्याः संतीति सरस्वतीति स्त्रीरूपो हरिरुच्यते। देवतांतरेतु सृगताविस्यतः कर्तर्यसुन्प्र

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः॥४।१॥ चोदयित्री सूनृतानां चेतंती सुमतीनां। यज्ञं द
धे सरस्वती॥४।२॥ ॥पावका। नः। सरस्वती। वाजेभिः। वाजिनीऽवती। यज्ञं। वष्टु। धियाऽवसुः॥ ॥चोद
यित्री। सूनृतानां। चेतंती। सुमतीनां। यज्ञं। दधे। सरस्वती॥ ॥

त्यये सार्वधातुकेति गुणे च सरः व्याप्तः सर्वत्रो वा हरिः सरः शब्दार्थः। तत्प्रियत्वेन तद्वान्वायुः सरस्वान्। सरस्वतः स्त्री सरस्वती वायुभार्या
चेनः अस्माकं यज्ञं वाञ्छं अध्यात्मं ज्ञानयज्ञं च वाजेभिः वाजैः अन्नैः अन्नादिदत्वेति यावत्। वष्टु वहतु प्रवर्तयत्विति। यज्ञं वष्टि यस्यायज्ञं व
हत्विति ब्राह्मणे व्याख्यातत्वात्। वह प्रापण इत्यस्य विकरणलोपः। तस्य षत्वं च छांदसं। अत्र भगवतः स्त्रीलिंगत्वं वाच्यत्वं प्रकृतिश्च प्रति
ज्ञा दृष्टांतानुपरोधादित्यधिकरणे चरमसूत्रे यो निश्च हि गीयत इत्यत्रोक्तदिशा अव्यवहितप्रसवहेतुत्वरूपस्त्रीत्वरूपनिमित्तसद्भावान्नि
रवद्यमेवद्रष्टव्यं॥ ॥१॥ ॥अथ द्वितीया॥ सूनृतानां सुवाचां चोदयित्री प्रेरिका। सुमतीनां सुबुद्धीनां। द्वितीयार्थे षष्ठी। चेतंती चेतयंती
स्वार्थे ण्यस्त्रेहयोरंतर्णीतिणिजिति स्वार्थे ण्यंतं स्तणीनणिच् सुबुद्धीनां ज्ञापिका। सरस्वती प्रागुक्तरूपा विश्ववारव्या वाणी च यज्ञं दधे स्वोक्त
पीयाबाग्बुद्धिप्रवर्तकत्वेन यज्ञादि धारिणी ति। स्तुतिवाग्बुद्धिमूलत्वात्सर्वकर्मणां॥ ॥४।२॥ ॥ ॥ ॥ ॥

अथ तृतीया॥ सरस्वती प्रागुक्तनिरुक्त्या तत्पदवाच्यः स्त्रीरूपो विष्णुः। महः तेजस्त्वान्महत्वाच्च महः पदोक्तं। अरं अलं आनंदरूपत्वहेतुना अ
र्णः पदवाच्यं। रेफाकारलोपः। स्वात्मानमेव केतुना ज्ञानेन भक्तानां ज्ञानं दत्वेति यावत्। प्रचेतयति प्रकर्षेण महत्तरज्ञानेन प्रकाशयेदित्यर्थः॥ वा
णीपक्षे महो अर्णः पदार्थं हरिं केतुना ज्ञानेन प्रचेतयति भक्तानामित्यर्थः॥ योग्यतया प्रशब्दः केतुगतप्रकर्षवाची। ततः सुज्ञानदानादिहेतोः
भक्तानां विश्वाः सर्वाः धियो बुद्धीः विराजति विराजयति। ज्ञानवतीर्बुद्धीर्विराजते॥ ॥इति तृतीयं सूक्तं॥ ॥३॥ ॥प्रथमोऽनुवाकः॥ ॥
॥दशर्चमैंद्रं चतुर्थं सूक्तं॥ तत्र प्रथमा। द्यविद्यवि दिवेदिवे। प्रतिदिवसं गोदुहे गोदोहाय। दुह प्रपूरण इत्यतः संपदादित्वात् क्विप्। सुष्ठु दोग्ध्री
सुदुघा। दुहः कप् घश्चेति कप्रत्यये हस्य घत्वेन रूपसिद्धिः॥ तां कामधेनुमिव ऊतये यजमानस्याभिप्रेतार्थसिद्ध्ये रक्षणाय वा। अवतेः क्तिनि

महो अर्णः सरस्वती प्रचेतयति केतुना। धियो विश्वा विराजति॥६॥ ॥सूक्तं॥३॥ ॥सुरूपकृत्नुमूतये सुदुघामिव
गोदुहे। जुहूमसि द्यविद्यवि॥१॥ उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः॥ ॥महः। अर्णः। स
रस्वती। प्र। चेतयति। केतुना। धियः। विश्वाः। विराजति॥६॥ ॥सुरूपऽकृत्नुं। ऊतये। सुदुघांऽइव। गोऽदुहे। जुहूम
सि। द्यविऽद्यवि॥ ॥उप। नः। सवना। आ। गहि। सोमस्य। सोमऽपाः। पिब। गोऽदाः। इत्। रेवतः। मदः॥ ॥

ज्वरत्वरेति ऊठि सवर्णदीर्घे च ऊतिरिति रूपसिद्धिः॥ सुरूपकृत्नुं सा धुरूपाणां कर्तारं विष्णुमिंद्रं च जुहूमसि आह्वयामः। ह्वेञ् शब्दइत्यतः
कर्त्तरि शपि तस्य लुकः श्लाविति द्विर्वचनसंप्रसारणपूर्वरूपत्वे धातोर्दीर्घः। इदंतो मसि। जुहूमसीति रूपं ज्ञेयं॥ ॥१॥ ॥८॥
॥अथ द्वितीया॥ हे सोमपाः इंद्र। यः रेवतः रयिमतो वितिरयित्रा छस्य यकारस्य मतुपि संप्रसारणे पूर्वरूपे आद्गुणः। अध्यात्मज्ञा
नारव्यरयियुक्तस्य बहिरपि तत्पूजार्थं हिरण्यादिनियमतो यजमानस्य इत् एव गोदाः ज्ञानदः मदः सुखकरीं च। सः हे नः अस्मा
कं सोमस्य सवना सवनानि उपागहि उपागच्छ। गमेः छत्वाभावश्छांदसः। आगत्य च सोमं पिबेत्यर्थः॥ ॥२॥ ॥श्रीराम॥६॥

अथतृतीया॥यस्मात्‌ज्ञानादिमतो ऽक्षिप्रेतार्थदायी अथतस्मात्वयंअंतमानां अंतेउत्तमोत्तमगणस्योतिमितानां।अत्युत्तमानामित्या
वत्॥द्वितीयार्थेषष्ठी।तेतव दृद्धियाः सुमतीनांसुमतीः।विद्याम लभेमहि।त्वंच नः अस्मान्अति अतिक्रम्य अन्यान्माख्यः।नैवपत्रय।द
यार्द्रइस्या अस्मानेवपन्रयेत्यर्थः॥आगहि आगच्छ॥चक्षिङो लुङिचक्षिङः ख्या ङितिलुङिलोपिरख्याङदेशोलुङितिलिप्रत्ययेत्ते: अ
स्यतिवक्तिख्यातिभ्यो ऽङित्यङन्देशोमाङ्योगेनाउभावेइत श्वेतिशिपइकार लोपेशिपः सस्यरुत्वविसर्गयोः ख्यइतिरूपं॥ ॥३॥ ॥
अथचतुर्थी॥चष्टिः स्वांतः करणंप्रतिवक्ति॥हे मन्मनः यद्यपित्वंइंद्रात्परा दूरेवर्त्तसे।तद्ग्रहणासमर्थं।यद्वाइंद्रोहरिः स्वतः परादूरेव
र्तते हृद्धिष्योनभवति॥तथापित्वं विग्रं वीत्युपसर्गोनअर्थे।ग्रहउपादानेकर्मणिङः।अग्राह्यं।अस्तृतं अनाछन्नं।स्तृञ् आछा
दनइतिधातोः।विपश्चितं।क्विपूर्वादाप्लृव्याप्तावितिधातोर्नसुन्प्रत्ययेधाताकारलोपे विपाट्व्याप्ताचित्चित्तंयस्यासौतंविपश्चितं।

अथ ते अंतमानां विद्याम सुमतीनां।मानो अतिख्य आगहि॥परेहि विग्रमस्तृतमिंद्रं पृच्छ विपश्चितं।यस्ते स
खिभ्य आवरं॥उत ब्रुवंतु नो निदो निरन्यतश्चिदारत।दधाना इंद्र इद्दुवः॥ ॥वर्गः७॥ ॥अथ।ते।अंतमानां।
विद्याम।सुऽमतीनां।मा।नः।अति।ख्यः।आ।गहि॥ परा।इहि।विग्रं।अस्तृतं।इंद्रं।पृच्छ।विपःऽचितं।यः।
ते।सखिऽभ्यः।आ।वरं॥ ॥उत।ब्रुवंतु।नः।निदः।निः।अन्यतः।चित्।आरत।दधानाः।इंद्रे।इत्।दुवः॥७॥

इंद्रंपरमेश्वरं इहिगच्छ शरणंयाहि अवगच्छेतिवा॥तदर्थंगुरून्पृच्छ।यःइंद्रः तेसखिभ्यः विषयेभ्यः आवरं आसमंतात्व
रःनित्यमुत्तमः।तमिंद्रमितिपूर्वेणान्वयः॥ ॥४॥ ॥अथपंचमी॥ये निदः समीपवर्तिनः स्वप्नादावेवइंद्रप्रशाद्धितविष्णुस
मीपेवर्त्तमानाः प्रल्हादयः तेउत ते पिनः अस्मान् प्रतिदेवं ब्रुवंतु परमेश्वरस्वरूपंयथावद्व्याकुर्वंतु।येचित् येपि अन्यतः स्था
नांतरात् अस्मात्संसारहेतोरज्ञानात् निर्गत्यैवतंपरमेश्वरं आरत प्रापुः उत ते पि ब्रुवंतु॥येचइंद्रइद्इंद्र ईश्वर एव दुवः प्राणा
न्आत्मनोविषयान्दुहंतीतिदुहे प्रत्ययः॥दधानाः वर्त्तंते।तत्प्राप्त्यर्थंतमुपासते।तेउतते पिनः परमेश्वरंब्रुवंतेवेतियथ
ध्याहारेणयोजना॥ ॥अत्रसूक्ते प्रथमोवर्गः॥ ॥

श्रीराम
११

तृतीयेतृचे प्रथमेयंतृक्।ओमासः आसमंताद्वरुरीकृताः मा प्रमा येस्ते ओमा।आजसेरसुक्।सर्वविषयकज्ञानवंतइत्यर्थः॥एतत्त्व भ
गवति।अन्यत्रचयथासंभवंतेयं।ॐपर्यायओकारवाच्येनमाः निर्मितारस्तपर्यायौ देवतांतरध्येयः॥ओमृत्वोपपदात्मानिर्माणइत्यतः कप्र
त्यये आतोलोपेच रूपसिद्धेः॥चर्षणीधृतः चर्षणीनांप्रजानांधर्त्तारः।दाश्वांसः दातारः।हे विश्वेदेवाः सर्वत्रप्रविष्टत्वहेतुनाविश्वेइत्युच्यमानाः
देवाः अग्निमीळइत्येनोक्तादिशादेवनाब्दितत्तग्गवद्रूपविशेषाः प्रसिद्धविश्वेदेवाश्च दाशुषोयजमानस्यसुतंसोमंप्रति आगत आगच्छत।गमेर्म
कारस्यछांदसोभावश्छांदसः॥विशः प्रवेशन इत्यतोवप्रत्ययः किच्च।असर्वनामत्वेपि जसः शीभावश्छांदसः।तेनविश्वइतिरूपंध्येयं॥देवतांतरे
तु सर्वशब्दपर्यायतया सर्वनामत्वादेवशीभावः॥१॥ ॥अथद्वितीया॥अप्तुरः कर्मवेगिनः।कर्मवाचिन्यप्शब्देउपपदे त्वर त्वरणइतिधातोः
क्विप् ज्वरत्वरस्त्रिव्यविमवामुपधायाश्चेतिवकारस्योपधायाश्च ऊठि कृते गुणे सवर्णदीर्घे हस्वत्वे च अप्तुरइतिरूपं॥तस्यसंबोधनंबहुवचनं।हे विश्वेदे
वासः विश्वेदेवाः स्वसराणि दिनानि प्रति उस्राः रश्मयइव तूर्णयः त्वरिताः संतो अस्मदीयंसुतं सोमं प्रत्यागंत आगच्छत॥ ॥२॥ ॥७॥

ओमासश्चर्षणीधृतो विश्वे देवास आगत।दाश्वांसो दाशुषः सुतं॥१॥विश्वे देवासो अप्तुरः सुतमागंत तूर्णयः।उस्राइव स्वस
राणि॥२॥विश्वे देवासो अस्त्रिध एहिमायासो अद्रुहः।मेधं जुषंत वन्हयः॥३॥३॥ ॥ओमासः।चर्षणिऽधृतः।विश्वे।दे
वासः।आ।गत।दाश्वांसः।दाशुषः।सुतं॥ ॥विश्वे।देवासः।अप्ऽतुरः।सुतं।आ।गंत।तूर्णयः।उस्राःऽइव।स्वसरा
णि॥ ॥विश्वे।देवासः।अस्त्रिधः।एहिऽमायासः।अद्रुहः।मेधं।जुषंत।वन्हयः॥ ॥

मूल

अथतृतीया॥अस्त्रिधः।स्त्रिधहिंसायामित्यतोभावेक्विप्।नविद्यतेस्त्रत्हिंसायेषांते अस्त्रिधः अहिंस्याः।एतच्च विशेषणंईशरूपाणांनि
त्यमुक्तत्वात।अन्यदेवानांनिश्चितमुक्तित्वादुपचारेणेतिज्ञेयं॥एहिमायासः आईहिमाया सइतिवर्णविवेकः।ईहचेष्टायामित्यतोड्
प्रत्यये इरितिरूपं।हिशब्दः प्रसिद्धवाचित्वान्निश्चितार्थः।आसमंतात्ईहा धीर्ना हि निश्चिता माया ज्ञानं येषांतेएहिमायाः।आजसेरसुक्।
सर्वविषयत्वंतच्च निश्चितज्ञानाइत्यर्थः॥अद्रुहः।द्रुहजिघांसायां क्विशास्तास्त्वर्थः।ततः संपदादित्वात्क्विप्।नविद्यतेद्रुग्येषांते अद्रुहः अ
दुःखाः।वन्हयः जगत्प्रवर्त्तकाः।वह प्रापण इत्यत औणादिको निप्रत्ययः॥हे विश्वेदेवासः विश्वेदेवाः मेधं अस्मदीयंयज्ञंजुषंतसेव
ध्वमित्यर्थः।जुषीप्रीतिसेवनयोः।अस्यानुदात्तत्वेपि व्यत्ययेन परस्मैपदेलोण्मध्यमपुरुषबहुवचनस्यव्यत्ययेन वज्रप्रत्यये शांत इत्यंता
देशोवातस्थस्थमिपांतांतंतामइतिप्राप्तस्यस्थादेशातकारस्यछांदसेनुडागमेवाजुषंतेतिरूपं॥ ॥इतितृतीयतृचेतृतीयातृक्॥३॥८॥

भु

द्वितीयवर्गे प्रथमा॥ हे दस्म शत्रुभेदिन्। दसु विभेदने इत्यतो मक्प्रत्ययः॥ अरिः उत अरयोपि कृष्टयः प्रजाः नः अस्मान् सुभगान् सदा वोचे
युः वदेयुः। वच परिभाषणे। छांदसं शबादि विकरणं मुमागमश्च। किंच वयमिंद्रस्य तव अनुग्रहे सतीति शेषः॥ शर्मणि सुखे स्याम तस्याम
व। तदनुग्रहे सति सुखिनो भवामेव॥१॥ ॥अथ द्वितीया॥ आशुशब्दो वीर्यवाची। आशु वीर्यं यस्यासावाशाविः। आशुपदस्थाकारस्याकारः।
तस्य संबुद्धिः। हे आशावे आशुवीर्य क्षिप्रकारिसामर्थ्य। आशुं क्षिप्रं वेगवंतमिति यावत्। द्रवहात्। यज्ञश्रियं यज्ञभूषणं नृमादनं पुंमद
करं। कृतपानानां पुंसां हर्षकरमिति यावत्॥ पतयत् पतयतेनं पातॄणां मदमुत्पाद्य पातयतीति हेतुं मंदयत्सखं मंदयति सखायमि
ति मंदयत्सखं। मयूरव्यंसकादित्वात्साधुत्वं। यः सोमं पिबति तत्सखीनां मदहेतुत्वं धावनादौ। कृतपानस्य बलवत्वेनाकृतपानेभ्यः
सखिभ्यः कृतपानस्य पुरोगमनानंदहेतुं तेषां करोतीति भावः॥ ईमित्यत्र आ ई इति विभागः। ईमित्यस्य तवेत्यध्याहृतेनान्वयः। आउ

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः। स्यामेदिंद्रस्य शर्मणि॥१॥ एमाशुमाशवे भर यज्ञश्रियं नृमादनं। पतयन्मं
दयत्सखं॥२॥ अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः। प्रावो वाजेषु वाजिनं॥३॥ ॥उत। नः। सुऽभगान्। अरिः।
वोचेयुः। दस्म। कृष्टयः। स्याम। इत्। इंद्रस्य। शर्मणि॥ ॥आ। ईं। आशुं। आशवे। भर। यज्ञऽश्रियं। नृऽमादनं।
पतयत्। मंदयत्ऽसखं॥ ॥अस्य। पीत्वा। शतक्रतो इति शतऽक्रतो। घनः। वृत्राणां। अभवः। प्र। वः। वाजेषु। वाजिनं॥

भरेति क्रियया अन्वयः। उक्तगुणविशिष्टं तवेंतवैव त्वदधीनमेव सोमं। स्वोदरे इति शेषः। आभर बिभृहि। भृञः शब्विकरणं छांदसं। अ
थवा लंतु। एवंविधं मनः हर्षसाधिदमित्याभरेत्यर्थः॥ मनसश्चैवं चलत्वादादौ भुक्तं। तदुद्रेकेण च पुंसां मदादिकं भवतीति ज्ञेयं॥२॥ ॥
अथ तृतीया॥ हे शतक्रतो। शतशब्दोऽपरिमितवाची। क्रतुर्ज्ञानं। हे अपरिमितज्ञानविष्णो। शताश्वमेधयज्ञपुरंदरेति वा। अस्य पीत्वा। द्वितीया
र्थे षष्ठी। अस्य एनं च स्वात्मीयं। त्वदधीनमेवेमं सोमं पीत्वा वृत्राणां यदिमांल्लोकानावृणोति तद्वृत्रस्य वृत्रत्वमिति श्रुतेः सर्वजीवावरणहेतूनां वृत्रपद
वाच्यानामज्ञानानां घनः अभेद्यः अभवः। अज्ञानेनानावृतोऽभूरिति यावत्। विष्णुपक्षे यस्मिन्पक्षे भगवता सोमः पीतस्तद्यज्ञे मोहितवि
ष्णुप्रसादात्तेषु मुक्तेषु अज्ञानस्पर्शो नस्ति तदुतिभावो ध्येयः। किंच संवाजिनं अन्नवन्तं। अन्नदनरमिति यावत्। वाजेषु अन्नेषु सर्वभोग
विषये प्रावः अरक्षः। वाजिनं यज्ञादिविषये वा अनेकं वाजेषु ज्ञानादिषु ऐसेभु प्रावः अरक्ष इति वा॥ ॥३॥ ॥

चतुर्थी॥ हे शतक्रतो। तं एवमुक्तगुणं वाजिनं योद्धारं त्वा धनानां ज्ञानादिवित्तानां सातये लब्धये वाजेषु युद्धेषु अज्ञानाद्यस्मद
रिपुभिः बाह्यशत्रुभिश्च सह वाजयामः योधयामः॥ ॥४॥ ॥अथ पंचमी॥ यः इंद्रः रायः अशेषद्रविणाख्याः अवनिः भूमिरिवा
स। यः महान् उत्तमः सुपारः सुसुखदः संस्तुतः पारयतीति सुपारः। सुन्वतो यजमानस्य सखा। तस्मै इंद्राय गायत सामगानं कुरुत हे
उद्गातारः इत्यर्थः॥ गै शब्दे। स्तुतिशब्दान् कुरुतेत्यर्थः॥ कंपो शेषयेहक्कापीत्यादेरत्र रायो इति कंपोऽशेषार्थः॥ ॥द्वितीयो वर्गः॥२॥
इति चतुर्थं सूक्तं॥ + यद्वा + ॥४॥ ॥पंचममपि द्व्यर्चमिंद्रसूक्तं॥ तत्राद्या॥ हे सखायः सखिभूताः। स्तोमवाहसः स्तोमान् सामवि
शेषान् वहंतीति स्तोमवाहाः। कर्मण्यणिति अण्प्रत्ययः। अत उपधाया इति वृद्धिः। स्तोमवाहा एव स्तोमवाहसः। आज्जसेरसुक्

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो। धनानामिंद्र सातये॥४॥ यो रायो ३ऽवनिर्महान्त्सुपारः सुन्वतः सखा। तस्मै
इंद्राय गायत॥ ॥सूक्तं॥४॥ ॥आ त्वेत निसीदतेंद्रमभि प्रगायत। सखायः स्तोमवाहसः॥ पुरूतमं पुरूणामीशानं वा
र्याणां। इंद्रं सोमे सचा सुते॥ ॥तं। त्वा। वाजेषु। वाजिनं। वाजयामः। शतक्रतो इति शतऽक्रतो। धनानां। इंद्र। सात
ये॥ ॥यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः। सखा। तस्मै। इंद्राय। गायत॥ ॥वर्गः ८॥ ॥आ। तु। आ। इत। नि।
सीदत। इंद्रं। अभि। प्र। गायत। सखायः। स्तोमऽवाहसः॥ ॥पुरुऽतमं। पुरूणां। ईशानं। वार्याणां। इंद्रं। सोमे। सचा। सुते॥

स्तोमवाहास इति वाच्ये छांदसो लुक्। उद्गातार इति यावत्॥ एत आगच्छत। आङ्पूर्वादिणो मध्यमपुरुषबहुवचनं॥ आ निषीदत आग
त्योपविशत। व्यवहिताश्चेत्याङोऽन्वयः। आगमननिषदनयोर्गानरूपक्रियायामभिसंभावसूचकस्तुशब्दः। स्पष्टत्वादियमृग्भाष्यकृता
न व्याख्याता। टीकायां तु व्याकृता॥ ॥१॥ ॥अथ द्वितीया॥ पुरूणां सुपूर्णानां मध्ये पुरुतमं पूर्णतमं। पुरूणामित्युक्त्येवातिशा
यार्थलाभात् तमप् पूर्वच्छांदसः। यद्वा तमु अभिकांक्षायां कर्मण्यकारप्रत्ययेन तममिति रूपं। पुरुभिस्तम्यते कांक्ष्यते इति पुरु
तमं। पुरूणामित्येतत् वार्याणामित्यस्य विशेषणं॥ वार्याणां वरणीयानां उपादेयानां वस्तूनां ईशानं अधीश्वरं इंद्रं सोमे सु
ते अभिषुते सति सचा सुखेनैव मनःप्रसादपूर्वकं गायतेत्यनुवर्त्य योज्यं॥ ॥२॥ ॥

अथपंचमी ॥ शुचयः शुभ्राः । सुताः अभिषुताः । दध्याशिरः । आशिरशब्दो मिश्रितार्थ इत्येके । अहो यत्रां नशितं दधि आशिरमित्यन्ये ॥
ततश्च आशिरं दधि येषु ते दध्याशिरः । दधिमिश्रिता इति यावत् ॥ इमे सोमासः सोमाः वीतये प्राप्तये । वीगतादिभिधातुपाठात् । यजमान
स्येंद्रप्राप्तयर्थे सुतपाव्ने सोमपे । पापानइत्यत आतो मनिन्क्वनिब्वनिपश्चेति वनिप्प्रत्ययः । इंद्रायर्थं तियांति । इणगतौ । गत्यर्थकर्मणीति
सुतपाव्न इति चतुर्थी । सूत्रार्थस्तु । गत्यर्थानां धातूनामध्वव र्जित कर्मणि द्वितीयाचतुर्थ्यौ भवतः । चेष्टायांगम्यमानायामिति । अध्यात्मं
तु सुताः वेदवाक्यसंघर्षवंतः शुचयः रागादिविधुराः दध्याशिरः दध्याशिराः दधिहरो धारणं । ध्यानमितियावत् । तेन मिश्रिताः ।
दधा धारण इत्यतः आदृगमजनहनः किकिनौ लिट् इति किप्रत्यये लिड्वद्भावे लिटि धातोरनभ्यासस्येति द्वित्वे पूर्वोभ्यास इति पूर्वस्या
भ्याससंज्ञायां ह्रस्व इति सूत्रेणाभ्यासस्य ह्रस्वत्वे धातोराकारस्य आतो लोप इटि चेति लोपे दधीति रूपं । सोमासः सोमाः मनां

सुतपाव्ने सुता इमे शुचयो यंति वीतये । सोमासो दध्याशिरः ॥ ९ ॥ त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इंद्र ज्ये
ष्ठ्याय सुक्रतो ॥ आ त्वा विशंत्वाशवः सोमास इंद्र गिर्वणः । शं ते संतु प्रचेतसे ॥ ॥ सुतऽपाव्ने । सुताः । इमे । शुचयः । यं
ति । वीतये । सोमासः । दधिऽआशिरः ॥ ९ ॥ ॥ त्वं । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इंद्र । ज्येष्ठ्याय । सु
क्रतो इति सुऽक्रतो ॥ ॥ आ । त्वा । विशंतु । आशवः । सोमासः । इंद्र । गिर्वणः । शं । ते । संतु । प्रऽचेतसे ॥ ॥ ॥

सि । सोमपदेन मनसो ग्रहणे एकदेवस्य युक्तिः प्रागेवोक्ता । सुतपाव्ने मनसा सेव्यायहरये वीतये तत्प्राप्त्यर्थं सदायंतीति । इणगतौ । इ
णो यण् ॥ ॥ वर्ग ९ ॥ ॥ द्वितीयवर्गे प्रथमा ॥ हे सुक्रतो शोभनज्ञान हे इंद्र सद्यः समाने हनि सद्य इति निपातनात् यस्मिन्नहनि स्वयं व
र्ततेतस्मिन्नहनीत्यर्थः ॥ सदा वर्तते अतः सद्यो वृद्धः सदा वृद्धः नित्यपूर्ण इत्यर्थः । त्वं सुतस्य पीतये सोमस्य पानाय यज्ञे यदजायथाः ।
अभिव्यक्तोऽभवः । तत् ज्येष्ठ्याय ज्येष्ठ्यव्यक्तये । सर्वदेवताभ्यो मिश्रायेन सोमपानादिना ज्येष्ठ्यं प्रकटयितुमेव न तु वृद्ध्यादिहेतोरिति
भावः ॥ ॥ १ ॥ ॥ अथ द्वितीया ॥ हे गिर्वणः गीर्वणः गीर्भिर्वननीयाः भजनीयाः । वनुसंभक्तावित्यतः कर्मणि असुन्प्रत्ययः
सर्वे विधयश्छंदसि विकल्प्यंत इति वा पे धायादीर्घाभावेनस्यणते गिर्वण इति संबुद्धौ रूपं । हे इंद्र प्रभो आशवः क्षिप्राः द्रवहाः । सोमासः
सोमाः त्वा त्वां आविशंतु । आविशंतु । अथ ते प्रचेतसे प्रकृष्टचित्ताय ते हरियाय सद्रूपाय यजमानाय शं सुखं संतु सुखकराः भवंतु ॥ ॥ २ ॥ ॥ श्रीराम १२

तृतीया ॥ हे शतक्रतो संपूर्णज्ञान शताश्वमेध । त्वां स्तोमाः सामविशेषाः अवीवृधन् अवर्धयंतिस्म । वृधुवृद्धावित्यस्मात्ण्यंताल्लुङि
चङि णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इति णौ चङ्युपधाया ऋकारस्य ऋकारविधिसामर्थ्यात् अंगस्या पि गुणाभावे ऋकारविशिष्टस्य वकारस्य चङीति द्वि
र्भावे उरदित्यभ्यासऋवर्णस्य अकारे सन्वल्लघुनीति सन्वद्भावे अभ्यासे दीर्घो लघोरित्यभ्यास दीर्घे च अवीवृधन्निति रूपं ॥
व्यंजनान्यस्य वर्धनस्य बहुमानपितृभ्रशताद्भवति व्यंजनमेव वृद्धिरिति ज्ञेयं ॥ त्वां उक्था उक्थानि । जस आकारादेशः । ऋक्स्तुतमं
त्रविशेषाः अवीवृधन् । यस्मादेवं तस्मात् नः अस्माकं गिरः त्वां वर्धंतु वर्धयंतु महद्गुणैर्युक्तं त्वां व्यंजयंतु । अंतर्णीतण्यर्थोद्रुपेन
नुदात्ते तो पिव्यत्ययेन परस्मैपदं ॥ ननु न कर्मणा वर्धते नो कनीयानिति श्रुतौ भगवतः कर्माधीनावृद्धिः प्रतिषिध्यते न सर्वथा वृद्धिः
तथा हि कर्मणेति विशेषवैय्यर्थ्यात् । तथा च कर्माधीन वृद्ध्यभावे पि स्वाभाविको पचय रूपा वृद्धिरस्त्वस्तु । प्रतिषेधादर्शनात् । सेव्या
वृद्धिरस्मादिदर्शनाच्च । अतोना कारादृष्टांते नवृद्ध्यभावो पपादनं युक्तमिति चेन्न ॥ श्रुतेः कर्मणापि न भगवतो वृद्धिः किमुत स्वयमिति के

त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धंतु नो गिरः ॥ अक्षितोतिः सनेदिमं वाजमिंद्रः सहस्रिणं । यस्मिन्विश्वानि पौंस्या ॥ ४ ॥
त्वां । स्तोमाः । अवीवृधन् । त्वां । उक्था । शतक्रतो इति शतऽक्रतो । त्वां । वर्धंतु । नः । गिरः ॥ ॥ अक्षितऽऊतिः । सनेत् । इमं । वाजं । इंद्रः ।
सहस्रिणं । यस्मिन् । विश्वानि । पौंस्या ॥ ॥

मुख्यार्थकतया व्याख्यानात् । तथा च भ्रमप्रदीपिकायां । कर्मणो विशेष निषेध स्तु वृद्धिलक्षणक्रियाकारणत्वेन संभावितेन कर्मणापि य
दानवर्धते तदा स्वयं कर्मणा विना न वर्धत इति किमु वक्तव्यमिति कैमुत्यप्रदर्शनपरतया अन्यथो ऽर्थविशेषमयतीति विभावि
ते ॥ ॥ ३ ॥ ॥ चतुर्थी ॥ यस्मिन् इंद्रे विश्वानि पौंस्यानि पौंस्यानि पौंस्यानि पौरुषाणि सामर्थ्यानि संति । गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्य
ञ् । ञिहादृद्धिः । पौंस्यमिति रूपं । यद्यपि ष्यञ्पवादतयास्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति धान्यानां भवने क्षेत्रे खञ् इत्येन सर्यते
घर्षेषु नञ्स्नञोर्विधानात् सौंस्नानीतिस्नञा निर्देष्टव्यं । तथापि गुणवचनस्य चेत्कर्मणि चेति चकारेण नञ्स्नञोरपि ष्यञादि
भिः समावेशोस्तीत्यभ्युपगमान्न बाध्यबाधकभावः । अतः पौंस्यस्यत्र गुणवचनेत्यादिनाष्यञ्संभवति । सः अक्षितोतिः अक्षी
णाभिप्रायः वांछितस्या विहतस्य पूर्तिमान् इंद्रः सहस्रिणं । सहस्रशब्दो ऽनंतवाची । अनंतवंतं । अनंतफलं इममिति यावत् । इमं वाजमन्नं हविः
सनेत् अस्मत्तो भजतां । वनसनसंभक्तौ । यद्वा त्वरजोऽर्थमन्यान्प्रतिवाजमस्माभिः सनेत् सनयेत् लंभयेत् । अस्मभ्यः यथेष्टं दद्यादित्यर्थः ॥

स्याः व्यत्ययेन चतुर्थ्येतवर्णनं वायुक्तं २

पंचमी॥ हे गिर्वण। प्राग्वत्। इंद्र। मर्ताः मर्त्याः नः अस्माकं तनूनां तनुभ्यः शरीरेभ्यः। यद्यपि क्रुधद्रुहेर्ष्यासूयार्थानामिति द्रुहयोगे चतु
र्थी प्राप्ता। तथापि व्यत्ययेन चतुर्थ्यर्थे षष्ठीति ज्ञातव्यं। अभि द्रुहन् द्रोग्धारो माभूवन्। द्रुहेः माङि लुङि। च्लिलुङीति प्राप्तस्य च्लेः पुषादिद्युता
द्यॢदितेनाङादेशे नमाङ्योग इत्यडभावे मा द्रुहन्निति रूपं। ननु तनूनामिति षष्ठी न युक्ता। तत्र [illegible] यावता क्रुधद्रुहोरुपसृष्टयोः कर्मेति क्रुधद्रुहोरि
ति संप्रदानसंज्ञायामप्राप्तायां कर्मसंज्ञैव विहिता। उपसृष्टश्चायं द्रुह्यतिः। अभिद्रुहन्निति श्रवणादिति चेन्न। नायमभिरुपसर्गः। किंतु तत्प्रतिरू
पकमव्ययं अभिप्रेतत्वे सैतदर्थकः। अत एव भाष्ये अभीत्यस्याभित इत्यर्थयार्थत्वमभिसंधाय कथं चनेत्युक्तं। अत एव परभाष्ये चिमा
भि द्रुहन् अभितो द्रोहं माकुर्युरित्युक्तं। एवं च तनूनामिति षष्ठी युक्तैव। ईशानः समर्थः हंतेन कारणेन नः अस्माकं वधं हननं। हनश्च व
ध इति हंतेरप्प्रत्ययो वधादेशश्च। यवय अपगमय। युमिश्रणामिश्रणयोरित्यस्मात् णिचि संज्ञापूर्वको विधिरनित्य इति अत उपधाया इति वृ
द्ध्यप्राप्तौ यवयेति रूपं। यद्वा यौतीति यवः पचाद्यच्। यवं करोतीत्यर्थे तत्करोतीति णिचि इष्टवद्भावात् टिलोपे तस्य स्थानिवद्भावाद् वृद्ध्यभावे

मानो मर्ता अभि द्रुहन् तनूनामिंद्र गिर्वणः। ईशानो यवया वधं॥ वर्ग १०॥ युंजंति ब्रध्नमरुषं चरंतं परितस्थुषः। रोचंते रोचना दिवि॥
मा। नः। मर्त्याः। अभि। द्रुहन्। तनूनां। इंद्र। गिर्वणः। ईशानः। यवय। वधं॥ १०॥ युंजंति। ब्रध्नं। अरुषं। चरंतं। परि। तस्थुषः। रोचंते।
रोचना। दिवि॥ ॥

यवयवयेति रूपं। अस्याः वर्णकांतरं तु। नस्तनूनां अस्मच्छरीराणां मर्त्तो माभिद्रुहन्। मनुष्येभ्यो विपत्तयो नैव स्युः। ईशानस्त्वं वधं यवय
प्रापय। दुर्जनैः क्रियमाणादुपद्रवान्मरणमेव वरं। अतस्तत्परिहारे कुर्वित्याशयः॥ ॥वर्ग १०॥ ॥इति पंचमं सूक्तं॥ ॥५॥ ॥
षष्ठमपि दशर्चं सूक्तं। तत्राद्या द्वितीया चतुर्थी च मारुत्यः। मरुद्भिः सहिताः स्तुत्यत्र सर्वे ब्रह्मादि देवा ध्येयाः। तृतीया पंचमी चेंद्र मारुत्यौ। शेषा
श्चैंद्र्य इति विभागः॥ ॥तत्राद्या॥ अत्र ब्रह्मादि सर्वे देवाः अरुषं अरुणवर्णं। ऋहनिभ्यामुषनिति अर्तेरुषन्प्रत्ययः। तस्थुषः स्थाव
रान् गिरीन् परितश्चरंतं ब्रध्नं बृधु वृद्धाविस्यतो नप्रत्यये धातोरमागमे युणादित्वाद्धि वकारस्य बकारे ब्रध्नमिति सिद्धत्वात्। तथा च वृध्नते
नब्रध्न आदित्यः वाच्यं दिवाकरं युंजंति नियुंजंते। प्रवर्त्तयंतीति यावत्। किंच तैरेव देवैः दिवाकरादन्यानि नित्राकरादीनि रोचना रोचनानि ज्यो
तींषि दिवि विविदिष्टपे रोचंते दीप्यंते। अन्यान् रोचयंति चेत्यर्थः। विष्णुपक्षे पूर्वस्मान्मंत्रात् पौंस्य पदं मंडूकप्लुत्या अनुवर्त्यस्य हरेः पौंस्यानि
सामर्थ्यानि अरुषं ब्रध्नं सूर्यं तस्थुषः परियुंजंति। तैरेव पौंस्यैर्निमित्तैः रोचनानि दिवि रोचंते रोचयंति च अन्यानि। रुचिर दीपने॥ ॥१॥ ॥

१४

द्वितीया॥ धोऽवधारणे। सघ स एव परमेश्वरः। दीर्घः प्राग्वत्। नः अस्माकं आसमंतात् योगे योगाय सायुज्यलक्षणमुक्तये भुवत्
अभवत् भवेत्। व्यत्ययेन लृङोऽधिकरणं। अडभावश्छांदसत्वात्। विकरणस्य सार्वधातुकमपिदिति ङित्वेन क्ङिति चेति गुणाभावे अचि श्नु
धात्विति उवङादेशे भुवदिति रूपं। स एव राये ज्ञानद्रविणरूपधनाय भुवत्। स एव च पुरंध्यां पुरं शरीरं धीयते अस्यामिति पुरंधिः बु
द्धिः। कर्मण्यधिकरणे चेति घोः किः। आतो लोप इटि चेत्याकारलोपः। पूर्वस्य मुमागमश्छांदसः। सर्वं बुद्धौ वर्त्तत इत्यध्यात्ममर्थः॥ बौ
द्ध्येतु पुरंधिः पत्नी। तन्नामसु पाठात्। योग इत्यत्रेव सप्तमी तादर्थ्ये। स एव पत्न्यर्थं भुवत्। अभवदित्यर्थः॥ किंच स इंद्रः वाजेभिः वाजैः अ
न्नैः सह। अन्नानि दातुमिति यावत्। नः अस्मान् प्रत्यागमत् आगच्छतु। लिङर्थे लुङ्। च्लिलुङीति च्लिप्रत्ययः। पुषादिद्युताद्यॢदितः प

सघानो योग आभुवत्स राये स पुरंध्यां। गमद्वाजेभिरा स नः॥ यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः।
तस्मा इंद्राय गायत॥ ॥सः। घ। नः। योगे। आ। भुवत्। सः। राये। सः। पुरं ऽध्यां। गमत्। वाजेभिः। आ।
सः। नः॥ ॥यस्य। सं ऽस्थे। न। वृण्वते। हरी इति। समत् ऽसु। शत्रवः। तस्मै। इंद्राय। गायत॥ ॥

रस्मैपदेष्विति च्लेरङ्॥ अडभावश्छांदसः। इतश्चेतीकारलोपस्तिपः। व्यवहिताश्चेत्याङोऽन्वयः॥ ॥२॥ ॥अथ चतुर्थी
॥ यस्य इंद्रस्य संस्थे। सं पूर्वस्य तिष्ठतेर्घञर्थे कविधानमिति भावे कप्रत्ययः॥ आतो लोपः। स्थिते सत्यामित्यर्थः। यस्मिन्
इंद्रे रथे स्थिते सतीति यावत्॥ समत्सु युद्धेषु शत्रवः हरी अश्वौ अश्वाग्रमपि न वृण्वते। न प्राप्नुवंति। तस्मा इंद्राय गायते
ति प्राग्वत्। इंद्राश्वानां सहस्रत्वेपि अग्रगामितया प्राधान्यात् तद्द्वयोरेवोक्तिः॥ अध्यात्मं तु। यस्य इंद्रस्य संस्थे यस्मिन् पर
मेश्वरे विशेषतो भक्तशरीरे संनिहिते सति समत्सु ज्ञानयुद्धेषु शत्रवः अज्ञानादीनि हरी विषयाहरणात् हर्यश्वरूपौ
मनोबुद्धी न वृण्वते नाशाना घावृते भवत इति॥ ॥इति चतुर्थी॥ ॥४॥ ॥

द्वितीया॥ ब्रह्मादिदेवाः प्रकृतविष्णुरूपो स्यानिवा अस्य इंद्रस्य रथे 'काम्या' काम्यौ गुणाधिकत्वेन कमनीयौ 'विपक्षसा' विपक्षसौ 'विवि
ष्टौ पक्षौ ययोस्तौ विपक्षौ विपक्षावेव विपक्षसौ। विविष्टपक्षयुक्तपक्षिणाविव शीघ्रगतिमंतावित्यर्थः। शोणा शोणौ। रक्तवर्णावित्य
थ गाम्यश्वयोर्मूर्ध्नि शोणत्वसंबंधाल्लक्षणया शोणावित्युच्यमानो 'धृष्णू' धृष्णौ 'नृवाहसा' नृवाहसौ नॄन् प्रतिवानरं इंद्रं वहंतावि
वान्नृवाहसौ हरी इंद्ररथाग्रगामिनावश्वौ युंजंति योजयंति प्रवर्तयंतीतियावत्। यद्वा देवाः प्रकृतविष्णुरूपो स्यानिवा अस्य भक्तजात
स्य रथे देहे गुणाधिक्येन काम्यौ विपक्षसौ क्षिप्रगामिनौ शोणौ सुरवंप्रासौ। शोणशब्द पर्यायशब्दे उपपदे अणगतावित्यतः पचाद्य
च् प्रत्यये धात्वकारस्योकारे शोणाविति सिध्येः। अव्याकुलाविति यावत्। धृष्णू धृष्णौ धैर्ययुक्तौ नृवाहसा नरं इंद्रं वहतेनौ हरि
विषयाहरणाधिकाद्वौ के मनोबुद्धी युंजंति योजयंति प्रवर्तयंति। उक्तगुणविशिष्टे स्वकीयमनोबुद्धी वा स्वरूपरथे प्रेरणाय युंजं

युंजंत्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः॥ ॥युंजंति। अस्य। काम्या। हरी इति। विऽपक्षसा। रथे। शोणा। धृष्णू इति। नृऽवाह
सा॥ ॥केतुं। कृण्वन्। अकेतवे। पेशः। मर्याः। अपेशसे। + इति + सं। उषत्ऽभिः। अजायथाः॥ ॥

ति॥ ॥२॥ ॥अथ तृतीया॥ हे इंद्र ईश्वर त्वं अकेतवे अज्ञाय। षष्ठ्यर्थे चतुर्थी। अज्ञस्य केतुं सज्ज्ञानं। केतुः केतश्चितिश्चि
त्तं मतिः क्रतुर्मनीषायामा यैति चतुर्थे गीताभाष्योक्तेः। कृण्वन् कुर्वन्। अपेशसे अपेशसः हे महीनस्य पेशाः हेम च कृपवन्।
उषद्भिः सम्यक् प्रकाशमाने। वशकांतावित्यतः शतृप्रत्यये ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति
चेति संप्रसारणे पूर्वरूपे शकारस्य व्रश्चेत्यादिना षकारे उषद्भिरिति सिद्धत्वात्। पौंस्यैरित्यनुवृत्तिः शोषो वा। सामर्थ्यातिशयैः सह सम
जायथाः। यद्वा व्यक्ततामगाः। न केवलं त्वं। किंतु मर्याः मरणवंतो देवा अपि अकेतवे केतुं अपेशसे पेशः कुर्वंतः स्वसामर्थ्यैः सह यज्ञे सम
जायंतेति॥ ॥३॥ ॥ ॥

-स्वमात्मानं दधाति पुष्णातीति स्वधा शब्दः सुखवचनः =

चतुर्थी॥ यज्ञियं यज्ञे भवं। यज्ञशब्दाद्भवार्थे घप्रत्यये घस्येयादेशो यस्येत्यकारलोपे यज्ञियमिति सिद्धं। यज्ञे वाच्यं नाम दधानाः हरेः शा
कयः देवता वा। आत् अकारवाच्याद्दिष्ट्योः निमित्तात्। विप्रिवत्तयेवेतियावत्। अहेति निपातस्तेदित्यर्थे। यज्ञे व्यक्तहादनंतरमेव स्व
धामनु सुखेनैव नलभ्ययेनेत्यर्थः। पुनर्गर्भत्वं गूढत्वं एरिमिरे आपिरे प्राप्ताः। ईर गतावितिधातोरनुदात्तेतः परस्य लिटस्तकयोर्नेशि
रेचितिदेनेच्॥ ॥७॥ ॥पंचमी॥ हे इंद्र गुहा। गुहाशब्दात्परस्याः सप्तम्या डादेशः। विद्धहेऽप्यर्थः। गुहायां संस्थितोपि लोकानां
गूढत्वेनावस्थितोपि सन् त्वं वीलु दृढं चित् अपि दृढमपि ब्रलांडादिकं आरुजत्नुभिः आरुजद्भिः। रुजो भंगे दृरस्मात् पादिकः
कत्नुप्रत्ययः। संहरद्भिः वन्हिभिः लोकं वहद्भिः। वहतेर्निप्रत्ययः। पोस्ये सामर्थ्यैः सह उस्त्रियाः प्रकाशहानि प्रकटहानि नानाविधप्रा
कट्यं अनुस्वेखात्नुसारेण अविंदः। विद्लृ लाभे इत्यतः शापित्रोमुचादीनामिति मुमागमः। लब्धवानसि। स्वप्रकाशो वर्तसे। यद्वा वीलु चित्

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियं॥ वीलु चिदारुजत्नुभिर्गुहा चिदिंद्र वन्हिभिः। अविंद उस्त्रिया अ
नु॥७॥ देवयंतो यथा मतिमच्छा विदद्वसुं गिरः। महामनूषत श्रुतं॥ ॥आत्। अह। स्वधां। अनु। पुनः। गर्भऽत्वं। आऽ
ईरिरे। दधानाः। नाम। यज्ञियं॥ ॥वीलु। चित्। आरुजत्नुऽभिः। गुहा। चित्। इंद्र। वन्हिऽभिः। अविंदः। उस्त्रि
याः। अनु॥ वर्ग११॥ ॥देवऽयंतः। यथा। मतिं। अच्छ। विदत्ऽवसुं। गिरः। महां। अनूषत। श्रुतं॥ ॥

दृढमपि ब्रलांडादिकं आरुजद्भिः संहरद्भिः वन्हिभिः लोकान् वहद्भिः देवैः सह त्वं उस्त्रियाः प्राकट्यानि आनुकूल्येन अविंदः लब्धवा
नसि॥ वर्ग११॥ ॥द्वितीयवर्गे प्रथमा॥ अच्छेति निपातः संशब्दार्थे। संहितायां दैर्घ्यं। अच्छ देवयंतः सम्यग्देवयंत्यः। सुप्तयर्थादीव्यतेः
णयंतात् लटः शत्रादेशः। लिंगव्यत्ययश्छांदसः। सम्यक् प्रकाशयंत्य इत्यर्थः। गिरः वेदरूपाः वाचः। यद्वा गिरंतीति गिरः। गृ निगर
णादुत्पतः कर्तरि क्विप्। वेदरूपां वाचमुच्चारयंतः पुरुषा इत्यर्थः। तदानुर्लिंगव्यत्ययः। यथायथास्थितं निर्विकारमिति यावत्।
मतिं मतिरूपं। विदद्वसुं लाभार्थस्य विदेः कर्मणि छांदसं रूपं। अथवा विद्लृ देनदत्यस्मादंतर्भावितण्यर्थाच्छतृप्रत्यये विंदत्सोदात्ति
न्नायवत्तयाज्ञापयति वसुधनादिकमिति विदद्वसुं लब्धवित्तं। औदार्यवत्तयाज्ञापितवित्तं वा। महां महांतं। महच्छब्दगतत कारनका
रयोर्लोपश्छांदसः। श्रुतं विश्रुतं प्रसिद्धं इंद्रं अनूषत णुस्तुतावित्यस्तो लुङि कुटादित्वात् ङित्वाद्गुणाभावे छांदसत्वादुवङभावे अडागमे

तृतीया॥मखः मखाभिमानी पुरुहूतः अनवद्यैः निर्दोषैः अभिद्युभिः अभितो द्योः प्रकाशो ज्ञानं येषां ते महाज्ञानैः। अभिपूर्वात्दिवु
द्युतौ। सिसि दिव उद्येयणादेशो च अभिद्युभिरिति रूपं। इंद्रस्य परमेश्वरस्य काम्यैः प्रियैः गणैः देवगणैः सह सहस्वत् सहो बायुस्तद्वान्
सहस्व यथा भवति तथेति वा। अस्मिंस्तु व्याख्याने क्रियाविशेषणता नपुंसकत्वं। इंद्रस्य सामर्थ्यं। इंद्रं व्यत्ययात्। परमेश्वरं अर्चति।
अर्चयति। वायुरिंद्रो देवाश्च महाज्ञानित्वाद् अनवद्यत्वात् मखाभिमानित्वाद् अतिप्रियत्वाच्च भगवंतमर्चयंतीति भावः। प्रसिद्धेंद्रविषयेतु। अन
वद्यैरभिद्युभिरिंद्रस्य काम्यैः ऋत्विग्गणैः क्रियमाणो मखः सहस्वत् बलवत् यथा भवति तथा अतिशयेन इंद्रं अर्चयति। चक्षुः पश्य
तीत्यादिवत्करणे कर्तृत्वोपचारः॥३॥ ॥चतुर्थी॥ परिज्मन्। परितो ज्मां भूमिं वर्तत इति परिज्मा तस्य संबुद्धिः हे परिज्मन् सर्वगत।
परितो ज्मां वर्तत इत्यर्थे परिज्मा शब्दात् ष्टिवितो ऽनि प्रत्ययः। केचित्तु परिपूर्वाद् जग तावित्यस्माद् अन्येभ्योपि दृश्यत इति मनिन्प्रत्यये धा

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति। गणैरिंद्रस्य काम्यैः॥ अतः परिज्मन्नागहि दिवो वा रोचनादधि। समस्मि
न्नृंजते गिरः॥ ॥अनवद्यैः। अभिद्युऽभिः। मखः। सहस्वत्। अर्चति। गणैः। इंद्रस्य। काम्यैः॥ ॥अतः। परिऽ
ज्मन्। आ। गहि। दिवः। वा। रोचनात्। अधि। सं। अस्मिन्। ऋंजते। गिरः॥ ॥

तकारस्य छांदसे लोपे परिज्मन्निति व्याचक्षते॥ उणादौ तु दवन् भजन् पुषन् प्लीहन् क्लेदन् स्नेहन् मूर्धन् मज्जन् अर्यमन् विश्व
न् परिज्मन् मातरिश्वन् मघवन्निति सूत्रे जवतिः सौत्रो धातुः परिपूर्वः ज्मादेशः। परिजवति सर्वतो गच्छतीति परिज्मन्निति परि
ज्मन् शब्दः। कनिप्रत्ययांतो निपातित इत्युक्तं। अतः प्रागुक्ताद्दिशा सर्वयज्ञभोक्तृत्वाद् दिवः स्वर्गात्। रोचनात् दीप्यमानात् सूर्यमंड
लाद्वा अधि अस्माकं समर्हणमधिकृत्य उद्दिश्य यज्ञस्थानं आगहि आयाहि। गमेर्बहुलं छंदसीति शपो लुक्। हेर्ङित्वाद् अनुदात्तोपदेश
त्यादिना मकारलोपः। अतो हेरिति हेर्लोपो न भवति। तस्मिन्कर्तव्ये असिद्धवदत्राभादिति मकारलोपस्यासिद्धवद्भावेन अकारां
तत्वाभावात् आगहीति रूपं। आगतौ हेतुं तरं चास्तीत्युच्यते। अस्मिन्यज्ञस्थाने गिरः स्तुतिरूपाः वाचः सम्यक् परममुख्यया वृत्त्या हांर्द
जंते प्रगुणं यंति अतश्चागहि। यद्यपि ऋजि भृज्जी वर्जने इति ऋंजतिर्वर्जने पठ्यते। तथापि धातूनामनेकार्थत्वाददोषः॥ ॥४॥ ॥ ॥

श्रीराम
१६

पंचमी॥ इतो वा अर्वाक्तनात् द्युलोकाद्वा पार्थिवात् पृथिवीसंबंधिनः पातालाद्वा महः महतः अकारतकारलोपश्छांदसः। रजसः र
जकाद्द्युलोकाद्वा। एतेषु लोकेषु स्थितमिति शेषः। सातिं लाभस्वरूपं। सनसंभक्तौ। अस्मात् क्तिन्प्रत्यये जनसनेत्यात्वे सातिः सं
भक्तिः संभजनं लाभ इत्यनर्थांतरं। एतादृशं इंद्रं अधीमहे स्मरामः इक् स्मरणे। स्तुमो वा इङ् अध्ययन इति धातोः। यास्त्वयामहे वा। या
च्ञाकर्मसु पाठात्। अत्र सूक्ते देवता विवादनिरासो भाष्यादौ व्यक्तः॥ ॥इति षष्ठं सूक्तं॥६॥ ॥वर्ग १२॥ ॥इंद्रमिदादिदशर्चमिंद्र
सूक्तं॥ तत्रेयमाद्या॥ बृहत् बृहंतं बृहच्छब्दात्सरस्यामः सुपांसुलुगिति लुक्। इंद्रमित् इंद्रमेव गाथिनः गाथाः गानानि तद्वंतः सामवे
दिनः औद्गात्रादिभिः उद्गातारः। अर्के ऋग्वेदः। अपवा दिद्दापि साम्नेति योज्यं। साम्ना अनूषत अस्तुवन्। णु स्तुतौ लुङ्। सार्वका
लिकः। सदा स्तुवंतीत्यर्थः॥ एवमग्रेपि। अर्किणः अर्काः ऋचः तद्वंतः बह्वृचाः अर्केभिः अर्कैः अर्कशब्दितांभिः ऋग्भिः इंद्रमनूषत।

इतो वा सातिमीमहे दिवो वा पार्थिवादधि। इंद्रं महो वा रजसः॥व०१२॥सू०६॥ इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः। इंद्रं वा
णीरनूषत॥ इंद्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इंद्रो वज्री हिरण्ययः॥ ॥इतः। वा। सातिं। ईमहे। दिवः। वा। पार्थि
वात्। अधि। इंद्रं। महः। वा। रजसः॥१२॥ ॥इंद्रं। इत्। गाथिनः। बृहत्। इंद्रं। अर्केभिः। अर्किणः। इंद्रं। वाणीः। अनू
षत॥ ॥इंद्रः। इत्। हर्योः। सचा। संऽमिश्लः। आ। वचःऽयुजा। इंद्रः। वज्री। हिरण्ययः॥ ॥

वाणीः वाण्यः सुपांसुलुक्। पूर्वसवर्णे तिपूर्वसवर्णदीर्घः। अन्याश्च यजुराद्या वाण्यः इंद्रमनूषत सर्वे स्तुवंति। करणे कर्तृत्वोपचारः। यद्वा
अध्वर्युप्रभृतय इत्यध्याहृत्य वाणीभिरनूषतेति योजना॥ ॥१॥ ॥द्वितीया॥ इंद्र इत् इंद्र एव वचोयुजा वचोयुजौ सुपांसुलुगि
त्यादिना आकारादेशः। वाङ्मात्रेणैव योगिनौ हर्योः अश्वयोः रथे सचा सखेनैव आसमंतात् संमिश्लः विमिश्रितः लसंगेर्वद्दसः। सार
थ्यमिति प्रयत्नमंतरेण रथयोगवद्धामश्वाभ्यां युक्तं रथमारूढ इत्यावत्। अध्यात्मं तु। इंद्रः परमेश्वरः भक्तदेहे वचोयुजा वचोयुजौ स्वदवाक्यानुव
र्तिनौ हर्योः मनोबुद्ध्याख्याश्वयोः संमिश्लः भक्तदेहाख्यं रथमध्यतिष्ठदिति योजना। किंचस इंद्रः वज्री वज्रायुधवान् परमेश्वरस्तु वज्री ज्ञाना
नंदवान्। व्रज गतौ रमु क्रीडायां आभ्यां धातुभ्यां औणादिके ऽप्रत्यये टिलोपे वज्रेति रूपसिद्धेस्तद्वान्वज्रीति सिद्धेः। हिरण्ययः हितश्च रमणीयश्चेति
हिरण्ययः हितशब्देन लोपः। रमुक्रीडायामित्यतोण्यप्रत्यये तलोपश्च निपातनात्॥ ॥२॥ ॥

तृतीया॥ इंद्रः पुरंदरः परमेश्वरो वा दीर्घाय चक्षसे जनानां महत्त्वेक्षण दीर्घकालं पदार्थदर्शनाय। चक्षिङ् व्यक्तायां वाचीति धातुपाठे पि
अनुदात्तेत्वं दर्शनकर्मापि भवतीति धातुवृत्तावुक्तेरिह दर्शनार्थात्तस्माद्धातोरसुन् प्रत्ययः। बहुलग्रहणात्ख्याञादेशाभावः। चक्षेर्बहुलं
शिच्चेति असुन्प्रत्ययस्य शिष्टत्वेन सार्वधातुकत्वया आर्धधातुकाधिकारविहितख्याञादेशानवकाशादित्यपि केचित्। सूर्यं दिविगगने आ
रोहयत् आरोपितवान्। किं च इंद्रः पुरंदरः गोभिः वज्रैः अद्रिं पर्वतं ऐरयत् हतवान् पक्षच्छेदनमकरोत्। गोभिः उदकैः इत्येतियावत्।
अद्रिं पर्वतं हतवान्। गोभिरुदकैः निमित्तैः उदकार्थमिति यावत्। अद्रिं मेघं ऐरयत् विभिन्नितवानित्यर्थः। इंद्रः परमेश्वरस्तु अद्रिं आदर
योग्यं मुख्यवायुं गोभिः ज्ञानैः व्यैरयत् समैरयत् ज्ञानयुक्तं प्रावर्तयदित्यर्थः। आङ्पूर्वकात् ईर गतौ इति धातोः आदृगमहनजनः इति क
र्मणि किप्रत्ययः यणादेशः। आङो ह्रस्वश्च व्यवहिताश्चेत्युपसर्गान्वयः॥ ॥३॥ ॥चतुर्थी॥ हे इंद्र उग्रः दुष्टानां क्रूरस्त्वं वाजेषु युद्धेषु

इंद्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि। वि गोभिरद्रिमैरयत्॥ इंद्र वाजेषु नो अव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः॥
इंद्रं वयं महाधन इंद्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणं॥ ॥ इंद्रः। दीर्घाय। चक्षसे। आ। सूर्यं। रोहयत्। दिवि। वि। गोभिः।
अद्रिं। ऐरयत्॥ ॥ इंद्र। वाजेषु। नः। अव। सहस्रऽप्रधनेषु। च। उग्रः। उग्राभिः। ऊतिऽभिः॥ ॥ इंद्रं। वयं। म
हाऽधने। इंद्रं। अर्भे। हवामहे। युजं। वृत्रेषु। वज्रिणं॥ ॥वर्ग१३॥ ॥

अस्मासु सहस्रप्रधनेषु सहस्रेण प्रधनं युद्धं येषां तेषु सत्स्वपि। अस्मासु बहुभिर्युध्यमानेषु सत्स्वपीति यावत्। नः अस्मान् उग्राभिः
दुष्टानां क्रूराभिः स्वयं तनुयैः ऊतिभिः अभिप्रायैः अव सर्वदा रक्ष॥ ॥४॥ ॥पंचमी॥ वृत्रेषु पूर्वोक्तनिरुक्त्या वृत्रशब्दवाच्येषु ज्ञाने
षु युजं तद्विरोधितया घटमानं। प्रसिद्धेंद्रपक्षे वृत्रेषु वृत्राद्यसुरेषु। णांत्वसप्तानां सप्तमी त्रौं डेरित्यादाविव बहुवचनमाद्यर्थे। वज्रिणं
गात्रुभिर्वर्जितं। भीतिवज्रेण अरयो नैनं प्राप्नुवंतीति यावत्। वृजी वर्जने इत्यतो बाहुलकात्कर्मणि इनिप्रत्यये धातोर्गुणे रपरत्वे वकारा
त्परस्य ककारस्य स्थानव्यत्यासलक्षणो वर्णविपर्ययश्च निरुक्तात्। इंद्रं महाधने निमित्तात्कर्मयोग इति निमित्तसप्तमी। केशेषु चमरीं हं
त्यादाविव तादर्थ्यार्था मोक्षरूपमहापुमर्थसिध्यर्थं। अर्भे अल्पे च धने सांसारिकपुरुषार्थे च महदल्पधनार्थिनो वयं हवामहे आह्व
यामः। ह्वः संप्रसारणमिति वर्तमाने बहुलं छंदसीति वस्यात् पूर्वरूपत्वादि॥ ॥सप्तमे सूक्ते प्रथमो वर्गः॥ ॥वर्ग१३॥ ॥ ॥

च अग्रतो रूपं। येतु णुः स्तुतौ इत्युकारस्य छांदसं दैर्घ्यं व्याकुर्वंति ते णूः स्तुतावितिदीर्घांतं धातुपाठे नापश्यन्॥ ॥१॥ इति प्रथमा ऋक्॥
द्वितीया॥ मंसु खं दत्त इति मंदूः सुखकरौ शं करपुरंदरौ। सुखवाचि मन्दशब्दे कर्मण्युपपदे दा ञः उ प्रत्यये छांदसमंदूः इति द्वितीयाया अलुकि
पूर्वस्य मंदुशब्दस्य सुखकरत्वात्स्थानमुखेन शंकरपुरंदरवाचित्वात्। मदात्मकत्वात् सुखात्मकत्वाद्वा ईश्वरो वा मंदूः। अस्मिन् पक्षे मंदि
स्तुति मोद मद स्वप्न कांति गतिषु इति धातोः उ प्रत्ययो नुमागमश्चेत्युक्तं भवति। संदृक्षसे परमेश्वरसंदर्शनाय। संपूर्वस्य दृशेस्तुमर्थे से
न् असे असेन् क्से कसेन् अध्यै अध्यैन् कध्यै कध्यैन् शध्यै शध्यैन् तवै तवेङ् तवेन इति सूत्रेण दृशिमित्यर्थे कसेन प्रत्यये प्रत्ययस्य छां
दसे सकारोपजने धातुशाकारस्य षश्चेत्यादिना षत्वे षढोः कः सीति कत्वे क्षत्वे तत एव गुणाभावे सं पूर्वत्वे च संदृक्षस इति रूपं। यद्वा दृशे
स्तुमर्थे से प्रत्यये धातुशाकारस्य छांदसे क्सादेशे इण्कोरिति सकारस्य षत्वे कषयोगे क्षत्वे संदृक्षस इति रूपं। केचित्तु दृशेस्तुमर्थे क्स

इंद्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा। मंदू समानवर्चसा॥
इंद्रेण। सं। हि। दृक्षसे। संऽजग्मानः। अबिभ्युषा। मंदूइति। समानऽवर्चसा॥ ॥

८+ लोपे च संजग्मान इति रूपं। प्रसिद्धेंद्रविषये तु मंदू इति सुखहेतु हाघावा भ्रमीग्लायेते॥ अन्यत्समानं॥ ॥२॥ ॥७॥ +६
से प्रत्यय इति पठित्वा न चोक्तप्रत्ययो नन्वशिष्टः। दृशो विख्ये चेत्यत्र चकारस्यानुक्तप्रत्ययसमुच्चयार्थत्वेन क्ससे प्रत्ययस
मुच्चयसंभवात् इति वदंति॥ अबिभ्युषा निर्भयेन। ञिभी भये इत्यस्माल्लिट्। शेषात्कर्तरीति परस्मैपदं। क्वसुश्चेति लिटः क्वसु
रादेशः। तस्य किंत्वाद्गुणाभावः। द्विर्भावः अभ्यासस्य ह्रस्वत्वजस्त्वे। वस्वेकाजाद्घसामिति नियमादिडभावेन समासे तृतीयैकवचन
स्य तत्वात् वसोः संप्रसारणमिति वकारस्य उकारः। संप्रसारणाच्चेति पूर्वरूपत्वं। शासिवसिघसीनां चेति षत्वं इयङादेशबाधनेन एरने
काच इति यणादेशः। सति चैवं अबिभ्युषेति रूपं। समानवर्चसा निर्विकारतेजसा इंद्रेण परमेश्वरेण संजग्मानः संजग्मानो व्यत्ययात्।
संगतो वायुर्भव तु। संपूर्वाद्गमेर्लिट् समो गम्यृच्छिभ्यामात्मनेपदविधानाल्लिटः कानजादेशो द्विर्भावहलादिशेषाभ्यासकुत्वेषु गमहन इत्युपधा

द्वितीयवर्गे आद्या॥ हे वृषन् अभीष्टस्य सेचक श्रेष्ठेति वा। वृषु सेचने इत्यतः कनिन्युषिवृषितक्षिराजीत्यादिना कनिन् प्रत्ययः। सत्रादावन् स-
र्वप्रद। सर्वशब्दपर्यायात्सत्राशब्दोपपदात् डुदाञ् दाने इति धातोः वनिप् प्रत्ययः। त्वं नः अस्मदीयं अमुं अपरोक्षमीक्षगतमितियावत्।
चरुं चर्वणीयं भक्षणीयं आनंदमित्यर्थः। चरगतिभक्षणयोरित्यस्मात् कर्मण्युप्रत्ययः। अस्मभ्यं अस्मदर्थे अपावृधि अविद्यावृतम
पावृणु। यतस्त्वमेवाप्रतिष्कुतः अप्रतिद्वंद्वः। ष्कुञ् आप्रवणे। आप्रवणमागमनं। वैरिभिर्युद्धेषु प्रत्यागतो नेत्यप्रतिष्कुतः। अप्रति-
द्वंद्व इति फलितोर्थः॥ यास्कस्तु अप्रतिष्कुतो अप्रतिस्खलितः। अस्माभिर्यद्यत्प्रार्थ्यते तेन तत्सर्वं नमेति शब्दं नो चारयतीति व्याख्यातवा-
न्। प्रसिद्धेंद्रपक्षे तु चरुं हविः अपावृधि स्वीकारेण सफलीकुरु। यद्वा चरुं मेघं। वज्रश्चरुर्वराहश्च मेघ इति मेघनामसु पाठात्। नः

स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः॥ तुंजेतुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः।
न विंधे अस्य सुष्टुतिं॥ ॥सः। नः। वृषन्। अमुं। चरुं। सत्राऽदावन्। अप। वृधि। अस्मभ्यं। अप्रतिऽ
स्कुतः॥ ॥तुंजेऽतुंजे। ये। उत्ऽतरे। स्तोमाः। इंद्रस्य। वज्रिणः। न। विंधे। अस्य। सुऽस्तुतिं॥ ॥

अस्मदर्थे मेघजातं अस्मभ्यमपावृधि उद्घाटयेति योज्यं। अपावृधीत्यत्र वृञ् वरणे इत्यस्मात् लोटि सिप्। तस्य सेर्ह्यपिच्चेति हिः।
स्वादिभ्यः श्नुः। तस्य बहुलं छंदसीति लुक्। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः। तस्य ङित्वात् पूर्वस्य गुणाभावः। सति चैवं वृधी
ति रूपं॥ ॥१॥ ॥द्वितीया॥ तुंजेतुंजे। तुंजतिर्गतिकर्मा दानकर्मा च। उभयार्थात् भावे घञ्। नित्यवीप्सयोरिति द्विर्वचनं। स
या क्रियमाणे गमने क्रियमाणे दाने वा। धातूनामनेकार्थत्वात् प्रेरणार्थो वा। स्तोतृषु सर्वेष्वेव प्रेरणे जाते सति ये उत्तरे उत्तमाः स्तो-
माः स्तुतिविशेषाः तेपि अस्य इंद्रस्य तव सुष्टुतिं सुष्टुतिं त्वं न विंधे न विंदते। न प्राप्नुवंति। भगवतोऽनंतगुणत्वेन सर्वविषयकत्व-
भावादिति। वर्णव्यत्ययत प्रत्ययलोपादिना छांदसं रूपं॥ ॥इति द्वितीया॥ ॥२॥ ॥

तृतीया॥एकस्य वृषस्य यः प्रतिवीरोऽपरो वृषो वर्तते सर्वे स इत्युच्यते। तं वंसं प्रतियो विभी: युधायागच्छति स वंसगः। वंसगो वृषा वृष
भः यूथा इव यूथानीव। यूथेत्यत्र शेश्छंदसि बहुलमिति शिलुक्। गवां यूथानि यथाकर्षति एवमीशानः प्रभुः अप्रतिष्कुतः पूर्वोक्तः द्विताऽप्र
तिद्वंद्वः इंद्रः कृष्टीः प्रजाः ओजसा सामर्थ्येन इयर्ति गमयति। प्रेरयतीति यावत्। ऋगताविति धातोः जुहोत्यादौ पठितस्य श्लौ श्लौ द्वि
त्वे हलादिशेषे उरदत्वं रपरत्वं अर्तिपिपर्त्योश्चेत्यकारस्येत्वं अभ्यासस्यासवर्णे इतीयङ्। सति चैवं इयर्तीति रूपं॥ ॥३॥ ॥चतुर्थी॥
य इंद्रः एक एव चर्षणीनां प्रजानां वसूनां वित्तानां च पंचक्षितीनां देवगंधर्वदैतेयपितृमानुषभेदेन पंचविधानां प्रजानामपि। अत्र चर्षणी
तानां द्वितीयार्थत्वं ज्ञेयं। इरज्यति नियमयति। इरंजरागइति दिवादिषु पठितो रागार्थोपि धातूनामनेकार्थत्वादैश्वर्यकर्मापि भवति।

वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा। ईशानो अप्रतिष्कुतः॥ य एकश्चर्षणीनां वसूनामिरज्यति। इंद्रः पंच क्षितीनां॥
इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥ व॰१४॥ सू॰७॥ ॥ वृषा। यूथाऽइव। वंसगः। कृष्टीः।
ऋ इयर्ति। ओजसा। ईशानः। अप्रतिष्कुतः॥ ॥यः। एकः। चर्षणीनां। वसूनां। इरज्यति। इंद्रः। पंच। क्षितीनां॥ ॥
इंद्रं। वः। विश्वतः। परि। हवामहे। जनेभ्यः। अस्माकं। अस्तु। केवलः॥ ॥१४॥ ॥

तथा च उक्तधातोः श्यनितस्य सार्वधातुकमपिदिति ङित्वादनिदितामित्यादिना नलोपः। तेषां राजा भवतीति फलितोऽर्थः। स कृष्टी
रियर्तीति पूर्वेणान्वयः। अत्र चर्षणीनां पंचक्षितीनामिति सामान्यविशेषभावादपौनरुक्त्यं ध्येयं॥ ॥४॥ ॥पंचमी॥ हे ज
नाः विश्वतः सर्वतः सर्वत्र स्थितं सर्वगतं इंद्रं जनेभ्यः वः युष्मभ्यं। युष्माकमर्थायेति यावत्। परि सम्यक् हवामहे व्यक्तरूपतया
एकत्रस्थातुमाह्वयाम इत्यर्थः। आहूतश्चासौ केवलः शुद्धः इंद्रः नः अस्माकं अस्तु इष्टदइति शेषः। केवृसेवनइत्यतो कलप्र
त्यये केवलइति रूपं। विश्वतस्परीत्यत्र पंचम्याः परावध्यर्थे इति विसर्जनीयस्य सत्वं। ह्वेञः श्रापि बहुलं छंदसीति संप्रसारणपूर्वत्वए
त्वगुणाबादेशे हुहवामहइति। जनेभ्य इति श्रवणात् हे जना इति संबोधनलाभो ध्येयः॥ वर्ग॥१४॥ ॥सूक्त ७॥ ॥द्वितीयोनुवाकः॥ ॥

तृतीया॥ हे इंद्र त्वोतासः त्वत्प्रेरिताः वयं वज्रं वज्रशब्दस्य ज्ञानानंदार्थकत्वात् ज्ञानं रतिं चेति वाज्ञाननिमित्तं रतिमिति वार्थः॥ घना तृतीयैक
वचनांतं भावप्रधानं च। घनात् दृढत्वेन आददीमहि लप्सेम। तत्प्रेरणयैव ज्ञानरतिमंतो भवाम॥ त्वोतासः त्वत्प्रेरिताः एव युधि स्पृधः स्पर्धिनः
तस्य संबंधियुद्धानि वा संजयेम तत्र जयवंतो भवाम॥ उद्दा अ दान इत्यतो लिङात्मनेपदोत्तमपुरुषबहुवचने महिङ् जुहोत्यादित्वात् श्लौ
श्लाविति द्वित्वे सीयुट् लिङः सलोपोऽनंत्यस्येति सलोपे स्नाभ्यस्तयोरात इत्याकारलोपे च व्यवहिताश्चेत्याङो न्वये आददीमहीति रूपं।
स्पर्ध संघर्षे इत्यतः कर्तरि क्विप् बहुलं छंदसीति रेफस्य संप्रसारणे ऋकारे अकारलोपे च स्पृध इति प्रथमाबहुवचनं रूपं॥ ॥३॥ ॥
चतुर्थी॥ हे इंद्र त्वया युजा युनक्तीति युक् तेन सख्या। त्वत्प्रसादेनेति यावत्। शूरेभिः शूरैः। अस्तृभिः असु क्षेपणे इत्यतस्ताच्छी
ल्यकस्तृन्प्रत्ययः। क्षेप्तृभिः सुयोधैर्भटैः सह वयं पृतन्यतः युध्यतः शत्रून् सासह्याम अतिशयेन पुनः पुनर्वा सहामहे। किंच व

इंद्र त्वोतास आ वयं वज्रं घना ददीमहि। जयेम सं युधि स्पृधः॥ वयं शूरेभिरस्तृभिरिंद्र त्वया युजा वयं। सासह्या
म पृतन्यतः॥ ॥इंद्र। त्वाऽऊतासः। आ। वयं। वज्रं। घना। ददीमहि। जयेम। सं। युधि। स्पृधः॥ ॥वयं।
शूरेभिः। अस्तृऽभिः। इंद्र। त्वया। युजा। वयं। सासह्याम। पृतन्यतः॥ ॥

यं च त्वया त्वदधीनसत्ताका इत्यर्थः। युनक्तीति युगिति टीका। युजेस्ताच्छीलिकः क्विन्निति क्विप्रत्ययो कुः आगमशासनमनित्यमिति युजेर
समास इति नुमनाश्रित इति केचित्। अपरे तु धातूनामनेकार्थत्वेन समाध्यर्थस्यापि योगार्थे तत्कारणाय स्मनानिर्देशः। अत्र पक्षे तु
नोऽनवकाशत्वाहुः। अन्ये तु युजेरसमास इति सूत्रे विभाषाग्रहणं मंडूकप्लुत्यानुवर्तते। तेन युक्तसमं विषमं चा युगित्यादिप्रयोग
उपपद्यते। नुमभावपक्षे कुत्वेन निर्देशोपपत्तेरित्याहुः। पृतन्यत इत्यत्र पृतनाशब्दः संग्रामनाम। पृतनामात्मन इच्छतीत्यर्थे सुप
आत्मनः क्यजिति क्यच्। सनाद्यंता धातव इति धातुसंज्ञायां सुपो धातुप्रातिपदिकयोरिति सुपो लुकि कव्यध्वरपृतन
स्यर्चि लोप इत्याकारलोपे क्यजंतात् लटः शत्रादेशे शपि अतो गुण इति पररूपत्वे च निर्वृत्तात् पृतन्यच्छब्दात् शसि पृतन्यत इति रूपं। सास
ह्यामेत्यत्र षह मर्षणे। धात्वादेः षः सः। धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। यङोऽचि चेति तस्य लुक्। सन्यङोरिति द्वित्वं। हलादिः शे

षः। दीर्घोऽकित इति दीर्घः। प्रार्थनायां यङ्लुगंतात् लिङ्। चर्करीतं चेति यङ्लुगंतस्य परस्मैपदित्वात् अदादिवद्भावयोर्विधानात् परस्मैपदे उत्तमपुरुष
बहुवचनं। शपो लुक्। नित्यं ङित इति सकारलोपः। यासुट् परस्मैपदेषूदात्तो ङिच्चेति यासुट्। लिङः सलोपोऽनंत्यस्येति यासुटः स+ पदोत्तमा
कारस्यापि लोपः। एवं च सासह्यामेति रूपं॥ ॥४॥ ॥पंचमी॥ नु यस्मात् असाविंद्रः विष्णुः महान् गुणैरनंतः। परश्च कालतोऽनंत
श्च। प्रथिना प्रथिम्ना द्यौर्न आकाशवत् देशतोऽप्यनंतश्च। पृथ्वादिभ्य इमनिज्वेति पृथुशब्दात् भावे इमनच्प्रत्ययेन कृते र ऋतो हलादेरिति ऋकारस्य
र भावे टेरिति टिलोपे प्रथिमन्शब्दात् परस्याङो भत्वात् अल्लोपोऽन इत्यकारलोपे छांदसमकारलोपे च प्रथिनेति रूपं। तथा। शवः सुखब
लात्मकश्च। ततस्तस्मात् महित्वं ब्रह्मत्वं वज्रिणे वज्रिनाम्नो विष्णोरेवास्तु जानीयादित्यर्थः। जीवस्य ब्रह्मत्वं तान्न स्मरेदिति तात्पर्यार्थः॥५॥
व०१५॥ ॥अथ द्वितीयवर्गे प्रथमा॥ समोहः संहर्षेन। वाशब्दोऽप्यर्थः। वह प्रापण इत्यतो घञर्थे कविधानमिति कप्रत्यये यजादित्वात्

महाँ इंद्रः परश्च नु महित्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः॥१५॥ समोहे वा य आशत नरस्तोकस्य सनितौ।
विप्रासो वा धियायवः॥ ॥महान्। इंद्रः। परः। च। नु। महिऽत्वं। अस्तु। वज्रिणे। द्यौः। न। प्रथिना। शवः॥१५॥
संऽओहे। वा। ये। आशत। नरः। तोकस्य। सनितौ। विप्रासः। वा। धियाऽयवः॥ ॥

प्रसारणे आद्गुणे सह गुणे समित्युपसर्गयोगे च समोह इति रूपं। समोहे वा युद्धे यत्। तत्प्रेरणेनापि अन्येन तु धाः परिणताः अपीतिया
वत्। तोकस्य अपत्यस्य ज्ञानमेव हि जीवितोपत्यं। सनितौ लाभे सति इंद्रं विष्णुं आशत अभ्युषत प्राप्ताः शरणमिति शेषः। यद्वतिश्रवणात्
इति लभ्यते। ते वा त एव नरः पुमांसः। अन्ये पत्रावइत्यर्थः। किंच ये धियायवः धियायुक्ताः युनिश्रेणी अन्येऽपि द्रवयत इति विच्। द्विरिय
हणात् सार्वधातुकार्धधातुकयोरिति प्राप्तगुणाभावः। तृतीयाया अलुक्। भगवज्ज्ञानिनः ते वा त एव विप्रासः विप्राः भगवद्ज्ञानिन
स्तेषु रइसमा इत्यर्थः॥ ॥१॥ ॥अथ द्वितीया॥ तस्य इंद्रस्य देवस्य यः कुक्षिः सोमपातमः अतिशयेन सोमपाः। समुद्र इव तन्ताकन
इव पिन्वते क्षरते। यदीयसोमं पिबति तस्मै सर्वान् कामानूददाति। पिवि सेचन इति धातोः। किंच तस्य काकुदो जिह्वा च। ककुदिति
तालुनाम। तत्र भवे स्वार्थे अण्प्रत्यये कृते आदिवृद्धौ अण्प्रत्ययाकारस्य लोपे काकुदिति रूपसिद्धेः। बहुवचनं तु बहुसुरेष्वपुसले

नबहुला इत्यर्थः। उर्वीः उर्व्यः बह्व्यः। आपो न आप इव तर्पका इत्यर्थः॥ ॥२॥ ॥तृतीया॥ यस्त्वै विरप्शी विशिष्टबलवान्। तस्य विर
प्शिनो बलिष्ठस्य तव संबंधिनी गोमती वाग्युता देवता वेदे स्तुत्या मही महती या सूनृता सा धीवाणी। सापि एवमेव हि कुक्ष्यादिवदेवदा
शुषे यजते पक्वा फलवती शाखावान् कल्पवृक्ष इव शाखेव वदान्या दात्री भवतीत्यर्थः॥ ॥३॥ ॥चतुर्थी॥ हे इंद्र ते दाशुषे हविर्यजते मावते
ज्ञानिने दातुः ते तव विभूतयः ऐश्वर्याणि ऊतयः रक्षाः सद्यश्चित् सद्यापि। प्राक् सद्यो वृध इत्यत्र ऊकदित्या नित्यमिति यावत्। संबं
वहि॥ ॥४॥ ॥पंचमी॥ अस्येंद्रस्य परमेश्वरस्य काम्या काम्यानि उक्थं उक्थानि सोमपीतये सोमपानार्थं इंद्राय शंस्यानि शंस्यान्येव हीति।
एवा हि शब्दयोरित्यन्वयः। स्तोमः स्तोमविशेषाश्च इंद्राय सोमपीतये। गेया इति शेषः। स्तुत्या प्रसन्न एव पिबतिन्द्र भिन्नौषेण। आप्तकाम

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते। उर्वीरापो न काकुदः॥ एवा ह्यस्य सूनृता विरप्शी गोमती मही। पक्वा शाखा न दाशु
षे॥ एवा हि ते विभूतय ऊतय इंद्र मावते। सद्यश्चित्संति दाशुषे॥ एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या। इंद्राय सोमपीतये॥
व०१६॥ ॥सूक्त०८॥ ॥इंद्रेहि मत्स्यंधसो विश्वेभिः सोमपर्वभिः। महाँ अभिष्टिरोजसा॥ ॥यः। कुक्षिः। सोमऽपातमः।
समुद्रः। इव। पिन्वते। उर्वीः। आपः। न। काकुदः॥ ॥एव। हि। अस्य। सूनृता। विऽरप्शी। गोऽमती। मही। पक्वा। शाखा। न। दाशुषे॥
एव। हि। ते। विऽभूतयः। ऊतयः। इंद्र। माऽवते। सद्यः। चित्। संति। दाशुषे॥ एव। हि। अस्य। काम्या। स्तोमः। उक्थं। च। शंस्या।
इंद्राय। सोमऽपीतये॥१६॥ ॥इंद्र। आ। इहि। मत्सि। अंधसः। विश्वेभिः। सोमऽपर्वभिः। महान्। अभिष्टिः। ओजसा॥ ॥

स्य कामस्य हेत्वादेरिति भावः॥५॥ ॥ऐंद्रसूक्ते द्वितीयो वर्गः॥ वर्ग१६॥ ॥सूक्त८॥ ॥इंद्रेहीत्यपि दशर्चमैंद्रं सूक्तं॥ तत्राद्या॥ इंद्र
आ इहि इति विभागः। ओमाङोश्चेति पररूपे। इंद्रेहीति संहिता। हे इंद्र महान् ओजसा सामर्थ्येन हेतुना सर्वं जगदिच्छाधीनं यस्य व
र्तते तादृश इति फलितोर्थः॥ महान् ओजसा अभिष्टिश्च सन् विश्वेभिः विश्वैः सोमपर्वभिः+ अभिष्टिः अभितः सर्वविषया इष्टिः इच्छा
यस्यासौ अभिष्टिः। अभीष्टिरिति वाच्ये शकंध्वादिषु पररूपं वक्तव्यमिति पररूपेणाभिष्टिरित्युक्तं। सामर्थ्येन + सोमपातृभिः देवैः सह
सोमशब्द उपपदात् पापाने इत्यतो अर्थे प्रत्यये आतो लोपे च सोमपर्वेति सिद्धेः। एहि। एत्य च अंधसः अंधसा हविरादिना अन्नेन मा हि
मदं सुखं प्राप्स्यसि। मत्सि इह लवे। व्यत्ययेन लुग्विकरणः॥ ॥१॥ ॥

श्रीराम
२०

स्यपि

अष्टममपि दशर्चमैंद्रं सूक्तं। तत्राद्या। हे इंद्र सानसिं सानो लाभः। षणसंभक्ताविति अतोर्भावे घञि उपधावृद्धौ निष्पन्नस्य सानशब्द
स्य संभजनापरपर्यायलाभार्थकत्वात्। सानो स्यास्तीत्यर्थे मत्वर्थे सिप्रत्ययः। लभ्यमुक्तं। सजित्वानं जेत्रा पुत्रादिना सहितं। जिजय
इत्यस्मादन्येभ्योपि दृश्यत इति क्वनिपि कृत्स्वस्य पिति कृति तुगागमे जित्वन्निति रूपं। सदासहं। सदा सहो यस्य सः सदासहः तं सदाबलव
तं। सहेर्घञर्थे कविधानमिति कप्रत्ययः। वर्षिष्ठं वृद्धतमं। सुमहदित्यावत्। वृद्धशब्दादिष्ठन् प्रत्यये प्रियस्थिरस्फिरोरुबहुलगुरुवृद्ध
तृप्रदीर्घवृंदारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृंदा इत्यनेन वृद्धशब्दस्य वर्षादेशो वर्षिष्ठमिति रूपं। ऊतये रक्षार्थे रक्षानिमित्तं
रयिं वित्तं ज्ञानद्रविणरूपं आभर आहर। हृग्रहोर्भः छंदसि हस्येति वक्तव्यमिति हकारस्य भकारः। देहीति यावत्॥ ॥१॥ ॥द्वितीया॥ ये
न इद्विवेन वित्तेन त्वोतासः त्वया ईरिताः वयं मुष्टिहत्यया मुष्टिघातेन अरीन् बाह्यशत्रून् निरुणधामहे निरुंध्मः। किंच येन त्वा न वित्तेन वृत्रा

ऐंद्र सानसिं रयिं सजित्वानं सदासहं। वर्षिष्ठमूतये भर॥ नि येन मुष्टिहत्यया नि वृत्रा रुणधामहे। त्वोतासो न्यर्वता॥
आ। इंद्र। सानसिं। रयिं। सऽजित्वानं। सदाऽसहं। वर्षिष्ठं। ऊतये। भर॥ ॥नि। येन। मुष्टिऽहत्यया। नि। वृत्रा।
रुणधामहे। त्वाऽऊतासः। नि। अर्वता॥ ॥

त्राणि अज्ञानानि निरुणधामहे। येन वित्तेन च अर्वता तुरगेण तुरगादिभिः कांश्चिदरीन् निरुणधामहे। तादृशं वित्तं आभरेति पूर्वेणान्व
यः। त्वाय वरुत्यत्र प्रत्ययोत्तरपदयोश्चेति युष्मदस्मदोर्मपर्यंतस्य त्वादेशः। युष्मदस्मदोरनादेश इत्यत्र विभक्ताविति अस्यानुवृत्तेः प्रत्ययो
त्तरपदयोः परतः युष्मदस्मदोरेतस्याकारादेशाप्राप्तेः अविभक्तावपि त्वदिकारस्य छांदसे आत्वे च त्वेति जातं। अवतेः कप्रत्यये तस्य छांदसे
उभावे ज्वरत्वरेत्यादिना वकारस्योठि कृते च निष्पन्नस्य ऊतशब्दस्य तृतीयांतेन युष्मच्छब्देन समासे त्वा ऊता इत्यत्र वृद्धिपरतः छांदसे एत्येधत्य
ठ्सु इति प्रसक्तायाः वृद्धेरभावे च निष्पन्नात् त्वोत इति प्रातिपदिकात् आज्जसेरसुगिति असुगागमे त्वोतास इति रूपं। धातूनामनेकार्थत्वाद्वतिः प्रेरणार्थे
पि भवतीति त्वया प्रेरिता इति व्याख्यानं युक्तं। रुधिर् आवरणे इत्यस्य स्वरितेतो लेट् उत्तमपुरुषबहुवचने तस्य महिङ् इत्यादेशे शाद्विकरणे टेरेत्वे आडुत्तमस्य
पिच्चेति आडागमे तत्संनियोगेन उत्तमपुरुषस्य पिद्वद्भावेन आङित्वा लोपाभावे च एतेरे रितिरे हे निरुणधामहे इति रूपं। उपसर्गस्य त्रिः श्रवणात् धातोर
प्यावृत्तिर्ज्ञेया॥ ॥२॥ ॥

द्वितीया॥ आ। ई। एनमिति विभागः। हे ऋत्विजः एनं मंदिं मदकारणं। मदिर्हर्षे। करणे इकारप्रत्ययः। नुमागमः। चक्रिं एमेनमित्यत्र श्रुताकारो
पसर्गस्य इहाप्यन्वयः। आ चक्रिं सम्यक् कर्मसाधनं विश्वं। आदृगमहनजनः किकिनौ लिट् चेति कृञः करणे कि प्रत्यये तस्य लिड्वद्भावे लि
टि धातोरनभ्यासस्येति द्विर्वचने यणादेशौ अभ्यासस्य उरदित्यत्वे कुहोश्चुरिति चत्वे चक्रिमिति सिद्धं। मंदिने मदशीलाय विश्वानि चक्रये
विश्वानि कार्याणि कृतवते इंद्राय विष्णवे। तस्य पानार्थमिति यावत्। आ सृजत सुते सोमे ईं एव संनिहितं कुरुत इत्यर्थः। स्वसंनिधान
पवित्रितमेव सोमं देवः पिबतीति यथा संनिधिस्तस्य भवति तथा कुरुत भो ऋत्विज इति भावः। सृजतेति दीर्घः संहितायां॥ ॥२॥ ॥
तृतीया॥ हे सुशिप्र शोभनहनो शोभनानंद विश्वचर्षणे विश्वानि चर्षणयः प्रजाः यस्य स तथोक्तः तस्य संबुद्धिः। विश्वजीवेश्वर। एषु त्रिषु सव
नेषु सचा सह अस्मद्रक्षयेति शेषः। अस्मद्रक्षां कुर्वन् मंदिभिः प्रागुक्तरीत्या मदहेतुभिः स्तोमेभिः अस्माभिः क्रियमाणैः स्तो

एमेनं सृजता सुते मंदिमिंद्राय मंदिने। चक्रिं विश्वानि चक्रये॥ मत्स्वा सुशिप्र मंदिभिः स्तोमेभिर्विश्वचर्षणे। सचैषु
सवनेष्वा॥ असृग्रमिंद्र ते गिरः प्रति त्वामुदहासत। अजोषा वृषभं पतिं॥ सं चोदय चित्रमर्वाग्राध इंद्र वरेण्यं। असदि
त्ते विभु प्रभु॥व०१७॥ ॥आ। ई। एनं। सृजत। सुते। मंदिं। इंद्राय। मंदिने। चक्रिं। विश्वानि। चक्रये॥ ॥मत्स्व। सुशि
प्र। मंदिऽभिः। स्तोमेभिः। विश्वऽचर्षणे। सचा। एषु। सवनेषु। आ॥ ॥असृग्रं। इंद्र। ते। गिरः। प्रति। त्वां। उत्। अहा
सत। अजोषाः। वृषभं। पतिं॥ ॥सं। चोदय। चित्रं। अर्वाक्। राधः। इंद्र। वरेण्यं। असत्। इत्। ते। विऽभु। प्रऽभु॥१७॥

मैः आमत्स्व आ सम्यक् मदं प्राप्नुहि॥३॥ ॥चतुर्थी॥ हे इंद्र अजोषाः बहुते अन्येन स्तुत्यरूपेण कश्चिदप्यसेव्याः ते त्वदीयाः वह्निः सृताः
गिरः वेदवाचः असृग्रं अनानते वृषभं श्रेष्ठं पतिं त्वां प्रतिलक्ष्य उत् उच्चैः सम्यक् मुख्यतयेति यावत्। अहासत अगमन्। ओहाङ् गतौ लुङात्म
नेपदे बहुवचनं। वह्निसृष्टास्त्वामेव मुख्यया वृत्त्या प्रतिपादयितुमस्माभिरुच्चारिता इति तात्पर्यं॥४॥ ॥पंचमी॥ हे इंद्र अर्वाक् अधस्ता
त् स्थितान् अस्मान् प्रति चित्रं वरेण्यं वरणीयं राधः ऐश्वर्यं संचोदय। अस्मभ्यं देहीति यावत्। दातुं ते तव विशिष्टं भवतीति विभु प्रकृ
ष्टं भवतीति प्रभु। विशेषेण प्रकृष्टमिति यावत्। प्रभु प्रभूतं अक्षय्यमिति वा। विप्रसंभ्यो ड्वसंज्ञायामिति भवतेर्डुः। न भमिति शेषः। असदित् इत्
अस्त्येवेत्यर्थः। असभुवीत्यस्य लिङर्थे लेट्। लेटोडाटाविति अगमः। इतश्च लोपः। परस्मैपदेष्विति तकारलोपः॥ ऐंद्रसूक्ते प्रथमः॥ ॥ ॥

द्वितीये प्रथमा॥ हे तुविद्युम्न महाकीर्ते इंद्र रभस्वतः शब्दवतः स्तोतॄन् इतियावत् यशस्वतः यशस्विनः अस्मान् राये। सतम्पिषा। महेश्व
र्यरूपे तत्र धनेस्मिन् सु चोदय सम्यक् प्रेरय। चुद प्रेरणे। धनविषयबुद्धियुक्तान्कुर्वित्यर्थः॥१॥ ॥द्वितीया॥ हे इंद्र विश्वं संपूर्णं आयुर्यस्यासौ विश्वा
युः नित्यं अस्मे अस्मासु सुपां सुलुगित्यादिना अस्मदो से इत्यादेशो लोपेन रूपं। गोमत् गोयुक्तं वाजवत् अन्नादिसहितं अक्षितं अक्ष
यं पृथु बृहत् अतिबृहत् श्रवः ज्ञानं श्रवसा श्रवणेन जातत्वाच्छ्रोतोः श्रवःशब्देन ज्ञानमुच्यते। संधेहि सम्यग्देहीति वर्णव्यत्ययः॥२॥ ॥
तृतीया॥ हे इंद्र अस्मे अस्मासु बृहत् श्रवः महतीं विद्यां सहस्रसातमं अतिशयेन सहस्रलाभसहितं बहुलाभप्रदं द्युम्नं कीर्तिं च ताः
प्रसिद्धाः रथिनीः रथो देहः आसामस्तीति रथिनीः इषः अन्नानि अविकल्पेन युक्तमन्नं च धेहि। वर्णव्यत्ययः। अत्र संचोदय चित्रमित्यादि

अस्मान्सु तत्र चोदयेंद्र राये रभस्वतः। तुविद्युम्न यशस्वतः॥ सं गोमदिंद्र वाजवदस्मे पृथु श्रवो बृहत्। विश्वायुर्धेह्यक्षितं॥ अ
स्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमं। इंद्र ता रथिनीरिषः॥ वसोरिंद्रं वसुपतिं गीर्भिर्गृणंत ऋग्मियं। होम गंतारमूतये॥ सुते
सुते न्योकसे बृहद्बृहत एदरिः। इंद्राय शूषमर्चति॥ व०१८॥ सू०९॥ ॥अस्मान्।सु।तत्र।चोदय।इंद्र।राये।रभस्वतः।तुविद्युम्न।
यशस्वतः॥ ॥सं।गोऽमत्।इंद्र।वाजऽवत्।अस्मे इति।पृथु।श्रवः।बृहत्।विश्वऽआयुः।धेहि।अक्षितं॥ ॥अस्मे इति।धेहि।
श्रवः।बृहत्।द्युम्नं।सहस्रऽसातमं।इंद्र।ताः।रथिनीः।इषः॥ ॥वसोः।इंद्रं।वसुऽपतिं।गीःऽभिः।गृणंतः।ऋग्मियं।होम।गं
तारं।ऊतये॥ ॥सुतेऽसुते।निऽओकसे।बृहत्।बृहते।आ।इत्।अरिः।इंद्राय।शूषं।अर्चति॥ ॥१८॥ ॥

नोक्तस्य पुनः पुनः कथने पि प्रार्थनारूपत्वान्न पौनरुक्त्यदोषः॥३॥ ॥चतुर्थी॥ वसोः। वसुशब्दो देववाची। वसोः वसूनां देवानां ये वसवः ते
षां पतिं देवदेवेश्वरं। ऋग्मियं ऋग्भिर्मेयं इंद्रं प्रभुं भक्तानां प्रतिगंतारं गीर्भिर्गृणंतः स्तुवंतो वयं ऊतये अभीष्टसिद्धये होम आह्वयामः। ह्वेञ् शब्द
इत्यस्य छांदसं रूपं॥४॥ ॥पंचमी॥ अरिः यः अविनाशी। रीङ् क्षय इत्यस्मात् औणादिके इः प्रत्यये अरिरिति सिद्धेः। आत्मनोऽविनाशे पु
पुरुषः सः बृहत्तम महत् रूपं स्वरूपं प्रति तच्चोदित्यर्थ इति। सुतेसुते प्रति सोमसवने ओकसे गृहाय। सतामिति योग्यतयान्वयः। सतामा
श्रयाय बृहते पूर्णाय इंद्राय इत् एव नमे ईश्वरायैव न्यर्चति। द्वितीयार्थे चतुर्थी। इष्टानिष्ट प्राप्तिपरिहान कामः परमेश्वरमेवार्चयेदिति
भावः॥ ॥५॥ ॥नवमसूक्ते द्वितीयो वर्गः॥ ॥वर्ग १८॥ ॥सूक्त॥९॥ ॥ ॥ ॥ ॥

तृतीया॥ हे सोमपाः इंद्र केशिना केशिनौ प्रलंबकेशवंतौ वृषणा वृषणौ सेचकौ युवानौ कक्ष्यप्रा कक्ष्यप्रौ। कक्ष्येति अश्वांगस्य बध्यमानर
ज्जुरुच्यते। पृ पालनपूरणयोः। कप्रत्ययः। पुष्टहहेतुना कक्ष्याभिपूरकौ हरी अश्वौ युक्ष्व युंक्ष्व। न जोपश्छांदसः। अंतर्णीतणिच्। रथयो
जय। अथ तदनंतरं इंद्र हे उपगम्य नः अस्माकं गिरां स्तुतिरूपवाचां उपश्रुतिं उपश्रवणं चर कुरु। मदीयस्तुतिगिरः शृणुवित्यर्थः॥३॥ ॥
चतुर्थी॥ हे इंद्र एहि आगच्छ। स्तोमान् स्तुतीन् अभिस्वर स्वीकारानुसारेण स्वनं कुरु। अभिगृणीहि स्तोतारः साधुकृतमित्येवमस्मत्प्र
शंसावाक्यमुच्चारय। आ तु व शुब्दे। पुनर्हर्षान्महत्तनं शब्दं कुरु। हे वसो वसति सर्वत्रेति वसुः। सर्वस्य वहिर्नेत वर्तमान। वसते उ
प्रत्ययः। नः अस्मदीयं ब्रह्म च स्तुतिं यज्ञं च सचा सह वसुरवेनैव वा वर्धय प्रवर्तय॥४॥ ॥पंचमी॥ पुरुनिःषिधे शत्रूणां बहुनिषेध

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा न इंद्र सोमपा गिरामुपश्रुतिं चर॥ एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव। ब्रह्म
च नो वसो सचेंद्र यज्ञं च वर्धय॥ उक्थमिंद्राय शंस्यं वर्धनं पुरुनिःषिधे। शक्रो यथा सुतेषु णो रारणत्सख्येषु च॥ तमित्
सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिंद्रो वसु दयमानः॥११॥ ॥युक्ष्व। हि। केशिना। हरीइति। वृषणा। क
क्ष्यऽप्रा। अथ। नः। इंद्र। सोमऽपाः। गिरां। उपऽश्रुतिं। चर॥ आ। इहि। स्तोमान्। अभि। स्वर। अभि। गृणीहि। आ। रुव।
ब्रह्म। च। नः। वसोइति। सचा। इंद्र। यज्ञं। च। वर्धय॥ उक्थं। इंद्राय। शंस्यं। वर्धनं। पुरुनिःऽसिधे। शक्रः। यथा। सुतेषु। नः।
ररणत्। सख्येषु। च॥ तं। इत्। सखिऽत्वे। ईमहे। तं। राये। तं। सुऽवीर्ये। सः। शक्रः। उत। नः। शकत्। इंद्रः। वसु। दयमानः॥१२॥ ॥

काय। दनुजांतकायेतियावत्। निरुपसर्गपूर्वकात्सिधतेः क्विप्। उपसर्गात्सुनोतीतिषत्वं छांदसं। इंद्राय परमेश्वराय तस्यैव वर्धनं वृ
द्धिकरं। प्रकाशमितियावत्। उक्थं उक्थनामकं शस्त्रजातं शंस्यं शंसनीयं स शक्रः यथा सोमेषु सुतेषु सत्सु ररणत् प्रारणत् रणत् श
ब्दे। शब्दं करोति। हविःषु स्थितः स्तुतिं प्रवर्तयति। एवं नः सख्येषु अस्मत्सख्याय च ररणत् शब्दमकरोत्। अस्मासु स्थितः सखा हम
स्मीति प्रारणदित्यर्थः। रणतेर्यङ्लुकि लेटि टितिपदकारलोपेन रणत्इतिरूपं॥५॥ ॥षष्ठी॥ यं इंद्रं सखित्वे। निमित्तसप्तमी। सखित्वार्थं
नित्यं शरणमीमहे गताः इङ् गतौ। राये वित्तार्थं तमीमहे प्राप्नुमः। सुवीर्ये साधुवीर्यार्थं च तमीमहे शरणं प्राप्ताश्च। स शक्रः शक्तिसुरेव त
पत्ते न शक्रशब्दवाच्यः। शक्ल शक्तौ। स्मुकीडायां आस्यांउप्रत्यये टिलोपे शक्रेतिसिद्धे। उत तस्मात् शकत् अशकत्। अडभावश्छांदसः।

तत्तत्प्राप्तिसंपादने शक्तो भवत्येव। किंच स इंद्रः नः अस्मभ्यं वसु वित्तं दयमानः इत्। दयदानगतिरक्षणेषु। इत एव। सर्वदा वर्तत इति शेषः। अत
श्च तमीमह इतिभावः॥ वर्ग ११॥ अत्र सूक्ते प्रथमो वर्गः॥ ॥द्वितीये आद्या॥ हे अद्रिवः प्राणप्रवर्तक हे इंद्र विष्णो। अद्रिः पर्वतस्तद्वत्कठोर
द्र पुरंदर। आङ्पूर्वादृनतेः क्विप्प्रत्ययः। वृतु वर्तन इत्यतो उसुन्प्रत्यये आङो ह्रस्वः। द्वितीयार्थे तु अद्रिशब्दोपपदात्तद्वृत्ते डसुन्प्रत्ययः
नलोपः। तस्य संबुधिः। हादानमितद्दत्तमेव। हातास इत्यत्रैव युष्मदर्थं। दोदध्येतिहाभावश्छांदसः। यत्राः सुविवृतं विस्पष्टं जग
द्विख्यातं सुनिरजं सुसुष्ठु निरजं अजगतिक्षेपणयोरित्यतः अकारप्रत्ययः। निः अत्र निषेधार्थः। आक्षेप्यं अनपहार्यं च। यस्मादेवं रूपं त
दीयं गवां नानानां व्रजं समूहं स्वरूपभूतं अपवृधि अपगतावरणं कुरु। नः अस्माकं राधः वृधिं च कृणुष्व कुरु। कृ ओव्यत्ययेन श्लुविकरणः॥
॥१॥ ॥द्वितीया॥ हे इंद्र ऋघायमाणं वर्धमानं। ऋधुवृद्धौ धातोस्ताद्धी ल्यस्यादिना चानत्प्रत्यये आनेमुगितिमुमागमे कंड्वादिभ्यो

सुविवृतं सुनिरजमिंद्र त्वादातमिद्यशः। गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः॥ नहि त्वा रोदसी उभे ऋघाय
माणमिन्वतः। जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि॥ ॥सुऽविवृतं। सुनिःऽअजं। इंद्र। त्वाऽदातं। इत्।
यशः। गवां। अप। व्रजं। वृधि। कृणुष्व। राधः। अद्रिऽवः॥ ॥नहि। त्वा। रोदसीइति। उभेइति। ऋघा
यमाणं। इन्वतः। जेषः। स्वःऽवतीः। अपः। सं। गाः। अस्मभ्यं। धूनुहि॥ ॥

यगितियकि अकृत्सार्वधातुकयोरितिदीर्घे चरूपं। सर्वगतमितियावत्। त्वां त्वां रोदसी द्यावापृथिव्यौ तदभिमानिन्यौ श्रीश्च
भूश्च अपि उभे सहिते नहि न्वतः नैव प्राप्नुतः। हिन्व व्याप्ताविति धातोः। बलप्रसादेन विना न प्राप्नुत इतिभावः। किंच स्ववतीः सु
खवतीः अपः प्रजाः स्वर्गेण उभुक्ता च जेषः अजयः। वशीकृतवानितियावत्। जि जये लङ् ये लेट् मध्यमपुरुषैकवचने सिपि परतः
लेटोऽडाटाविति अडागमे सिब्बहुलं लेटीति सिपि नस्यषत्वे धातोर्गुणे लादेशो शेपी सुतेर्विसर्गे च जेषइतिरूपं। एवंविधश्च त्वं त्वयम
स्मभ्यं गाः ज्ञानानि संधूनुहि। यद्वा सममिति गो विशेषणं। संगाः प्रसिद्धाः गाः धूनुहि धूञ् कंपने। कंपय गमय अस्मान्प्रति प्रापयेतियाव
त्॥ ॥२॥ ॥

तृतीया ॥ हे आश्रुत्कर्ण आसमंतात् श्रुणुत इति आश्रुतौ कर्णौ यस्य तस्य संबुधिः। बहुश्रवणकर्णेतियावत्। हवं अस्मदीयमाह्वानं श्रुधि
श्रुणु। श्रुश्रवणे। कृत्यश्चश्छंदसीति हेर्धिरादेशः। विकरणलोपः। नुचित् अद्यैव मम मयि गिरः वेदरूपा वाचः दधिष्व। धृधारणे। धेहि। वे
दविदं मां कुर्वितियावत्। हे इंद्र इमं स्तोमं मम कृतस्तुतिविशेषं युजश्चित् योगादपि समाधिलक्षणात् अंतरं संनिकृष्टं प्रियमितिया
वत्। कृष्व कुरु। लुग्विकरणं छांदसं। संहितायां दैर्घ्यं ॥ ॥३॥ ॥चतुर्थी॥ हि यस्मात् वृषंतमं वृषः वा किमान् अतिशयेन वृषो वृषं
तमः तं। छांदसो नकारागमः। रश्मिमत्तमं। वाजेषु युद्धेषु हवनश्रुतं आह्वानस्य श्रोतारं च। त्वाहां विद्म विद्मः। जानीमः। तस्मात् वृ
षंतमस्य तव सहस्रसातमां। सहस्रं संसनोतीति सहस्रसा। षणुदाने उः स्त्रीत्वं। यद्वाडापूप्रत्ययः। अतिशयेन सहस्रसा सहस्रसा
तमा। बहुलाभकृत्तमां ऊतिं रक्षां। अवतेरौणादिके तिप्रत्यये निलुक्त्वे तिरुडभावे क्तिनीत्यनुवर्तमानपक्षेन तनेति कृतेनोति

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इंद्र स्तोममिमं मम कृष्वा युजश्चिदंतरं ॥ विद्मा हि त्वा वृषंतमं वाजेषु हवनश्रुतं।
वृषंतमस्य हूमह ऊतिं सहस्रसातमां ॥ आ तू न इंद्र कौशिक मंदसानः सुतं पिब। नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिं॥
आश्रुत्ऽकर्ण। श्रुधि। हवं। नु। चित्। दधिष्व। मे। गिरः। इंद्र। स्तोमं। इमं। मम। कृष्व। युजः। चित्। अंतरं ॥ विद्म। हि। त्वा। वृ
षन्ऽतमं। वाजेषु। हवनऽश्रुतं। वृषन्ऽतमस्य। हूमहे। ऊतिं। सहस्रऽसातमां ॥ आ। तु। नः। इंद्र। कौशिक। मंदसानः।
सुतं। पिब। नव्यं। आयुः। प्र। सु। तिर। कृधि। सहस्रऽसां। ऋषिं ॥

रितिरूपसिद्धेः। हूमहे आह्वयामः। प्रार्थयामइतियावत्। ह्वेञ् शब्दइत्यतो लुग्विकरणादिश्छांदसं ॥४॥ ॥पंचमी॥ हे कौशिक
ब्रह्मांडकोशस्थ इंद्र विश्वेश्वर कोशशब्दात् स्वार्थे ठक्। हे कौशिक अदितिदेव्या जन्मसमये कुशे गेहे हीन तहेतुना कौशिकशब्दो वा इं
द्र पुरंदर। कुशशब्दात् गृहीतइत्यर्थे ठक्। तस्य कादेशा द्विश्यं ताकारलोपः। मंदसानः। मंदो मदः। आधिक्ये अधिकमिति वु
चनात् नित्यसुखं तस्य सानो लाभो यस्य सो मंदसानः नित्यसुखी त्वं नः अस्माकं सुतं सोमं तु क्षिप्रं आपिब। नव्यं नुस्तुतौ अघ्न्या
यदितियत्प्रत्ययः। स्तुत्यं आयुश्च नः अस्मभ्यं प्रसुतिर आतेप्रकर्षेण देहि। मां सहस्रसां सहस्रलाभयुक्तं ऋषिं ज्ञानिनं कृधि कुरु ॥ ॥५॥ ॥

गायंति हे त्वा इत्यस्य दशर्चस्य सूक्तस्य मधुच्छंदा ऋषिः। अनुष्टुप् छंदः। इंद्रो देवता। विनियोगः ब्राह्मणे। तत्राद्या ॥ हे शतक्रतो बहुज्ञान अर्कं अत् अति कं सुखं अ
तिशयेन सुखस्वरूपिणं त्वां त्वां गायत्रिणः गायत्रं सामविशेषः तद्वंतः सामगा इतियावत्। गायंति। अर्किणः अर्काः ऋचः तद्वंतः ऋग्वेदिनः त्वा
मर्चंति। नुचस्तुतौ। ऋग्भिः शंसंतीत्यर्थः। किंच ब्रह्माणः विरिंचाः उद्वंशमिव वंशाग्रकेतुमिव उद्धितमितियावत्। त्वां एमिरे अजानन्। धातूना
मनेकार्थत्वादेमिरत्र ज्ञानार्थः। यद्वा उदेमिरे उत् उपसर्गान्वयः उदयच्छन्नित्यर्थः। तस्योद्धितत्वं नसंभवतीत्युद्धितत्वेन व्यजानन्नित्यर्थः। ए
मिरइति लिडात्मनेपदं छांदसं ॥ ॥१॥ ॥द्वितीया॥ हे अस्पष्ट गूढशक्तिमन् यत् यस्मात् तव कर्त्वं कर्तृत्वं करणे सामर्थ्यं। कृत्यार्थे तवैके
न्केन्यत्वन इति कृत्वोभावेत्वन्। लक्षणया सामर्थ्यलाभः। सानोः सानुं आरुहत्। सानुपदस्य गिरिशृंगवाचित्वेपि अत्र तद्योगात् दुर्ला
दुर्लभमभवदित्यर्थः। भूरि ततोप्यधिकं चाभवत्। तत्तेन कारणेन वृष्णिः वर्षति। स सेचक इंद्रो भवान् अर्थं सर्वपदार्थान् चेतति। चेति

गायंति त्वा गायत्रिणोऽर्चंत्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ यत्सानोः सानुमारुह
द्भूर्यस्पष्ट कर्त्वं। तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ ॥गायंति। त्वा। गायत्रिणः। अर्चंति। अर्कं।
अर्किणः। ब्रह्माणः। त्वा। शतक्रतो इति शतऽक्रतो। उत्। वंशंऽइव। एमिरे ॥ ॥यत्। सानोः। सानुं। आ।
अरुहत्। भूरि। अस्पष्ट। कर्त्वं। तत्। इंद्रः। अर्थं। चेतति। यूथेन। वृष्णिः। एजति ॥ ॥

संज्ञाने। जानाति। अतएव यूथेन मुक्तामुक्तसमूहेन एजति। एजतिरन्तर्भावितण्यर्थः। कंपयतीत्यर्थः। नहि पूर्णशक्तिता मैतन्नेणा सार्वज्ञं
सर्वेश्वर्यं युज्यत इतिभावः। यद्वा यत् यस्मात् कारणात् इंद्रस्य परमेश्वरस्य कर्त्वं कर्तव्यं। तत्र कर्त्वस्य छांदसो लोपः। सानोः सानुं
इवचंद्रब्रह्मादिदेवताजातं आरुहत् प्राप्तं। परमेश्वरः ते पुरस्थितमाकरोतीति तेन कारणेन कर्तृत्वं भूरि अस्पष्ट। स्पष्टा अज्ञातइति असं
शयेन स्पष्टमभवदित्यर्थः। न हि अन्यांतर्गततया विना साक्षादीश्वरकर्तृत्वं दृश्यते। ततश्च सर्वकर्मकर्तृत्वादेव अर्थं अशेषार्थान् चे
तति जानाति। वृष्णिः वर्षिता। यूथेन स्वीयरूपाणां समूहेन एजति। एजृकंपने। कंपते चेष्टत इत्यर्थः ॥ ॥२॥ ॥ ॥ ॥

षष्ठी ॥ हे गिर्वणः गीर्भिर्वननीय । व्याख्यातपदमेव पुरस्तादाविर्बभूवेत्यत्र । इमाः मदीयाः गिरः स्तुतिरूपा वाचः विश्वतः विश्वस्मिन्काले
सर्वदेतियावत् । वृद्धायुं । वृद्धः आयो लाभो यस्यासौ वृद्धायुस्तं । व्यत्ययेनोकारः । सर्वलाभिनं त्वां परिवृताः भवंतु । किंच वृद्धयः वृद्धि
रूपाः वृद्धिप्रकाशिन्यः जुष्टाः सेव्याः नः गिरः जुष्टयः अनुभवंतु हर्षे वानुरूपा भवंतु ॥ वर्ग ॥ ॥२०॥ सूक्त ॥ ॥१०॥ ॥ ॥
॥ इंद्रं विश्वा इत्यष्टर्चमैंद्रं । एतदप्यानुष्टुभं छंदस्कं । तद्देवतात्वात्कैव । तत्राद्या ॥ समुद्रव्यचसं सम्यगुद्रिक्तानां गुणानां व्यचिर्व्याप्तिर्यस्या
सौ समुद्रव्यचाः तं । समुद्रवदिंद्रवेः गुणानां योग्यतयान्वयः । व्यचः शब्दो व्याप्तिविवक्षया नपि वाचकः ॥ रथीनां रथितमं वाजानां अन्ना
नां पतिं । सत्पतिं सतां पतिं इंद्रं विश्वा गिरः सर्वा वेदवाचः अवीवृधन् प्रकाशितवत्य इत्यर्थः ॥ नित्याभिवृद्धस्य वृद्धिकृतेन योगात्मकाशाथो
व्याख्येयः ॥१॥ ॥ द्वितीया ॥ हे शवसस्पते शवसः सुखस्य पते बलस्य वा पते हे इंद्र ते सख्ये सति त्वदनुग्रहे सति वा वाजिनो युद्धवंतो

परि त्वा गिर्वणो गिर इमा भवंतु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवंतु जुष्टयः ॥२०॥ इंद्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिं ॥ सख्ये त इंद्र वाजिनो मा भेम शवसस्पते । त्वामभि प्रणोनुमो जेतारमपराजितं ॥ पू
र्वीरिंद्रस्य रातयो न वि दस्यंत्यूतयः । यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं ॥ ॥ परि । त्वा । गिर्वणः । गिरः । इमाः । भवं
तु । विश्वतः । वृद्धऽआयुं । अनु । वृद्धयः । जुष्टाः । भवंतु । जुष्टयः ॥२०॥ ॥ इंद्रं । विश्वाः । अवीवृधन् । समुद्रऽव्यचसं । गिरः ।
रथिऽतमं । रथिनां । वाजानां । सत्ऽपतिं । पतिं ॥ सख्ये । ते । इंद्र । वाजिनः । मा । भेम । शवसः । पते । त्वां । अभि । प्र । नोनुमः । जे
तारं । अपराऽजितं ॥ पूर्वीः । इंद्रस्य । रातयः । न । वि । दस्यंति । ऊतयः । यदि । वाजस्य । गोऽमतः । स्तोतृऽभ्यः । मंहते । मघं ॥

वयं मा भेम मा भैष्म । ञिभी भये । व्यत्ययेन लुग्विकरणं । एतदर्थं परेषां जेतारं स्वयमपराजितं त्वां अभिप्रणोनुमः । प्रकर्षेण पु
नः पुनः स्तुमः । णु स्तुतौ । धातोः क्रियासमभिहारे यङिति यङ् । यङो चि चेत्यस्य लुकि रूपं ॥२॥ ॥ यदि इंद्र गोमतो वाजस्य व्य
त्ययेन गोमदन्नं मघं धनं स्तोतृभ्यो मंहते मंहति । मंहतिर्दाने । ददाति । तर्हि इंद्रस्य ते तव रातयः दानानि ऊतयः अवनानि पूर्वीः पूर्व्याः प्रथमा
नि । महत्त्वेन कारणेन श्रेष्ठानीत्यर्थः । किंच न विदस्यंति न विदस्यंते । दसु उपक्षये । न क्षीयंते । न नश्यंतीति वार्थः ॥ दसु क्षय इति धा
तोः ॥ ॥ इति एकादशे सूक्ते तृतीया ऋक् ॥ ॥३॥ ॥

चतुर्थी ॥ पुरां शरीराख्यपुराणां शंबरस्य पुराणां च भिंदुः भेत्ता युवा तरुणः कविः सर्वज्ञः अमितौजाः अमितमोजो यस्यासावमितौजाः
विश्वकर्मणो धर्त्ता सर्वकर्मणां प्रेरकः वज्री ज्ञानानंदवान् वज्रायुधवान्वा पुरुष्टुतः पुरुभिः बहुभिः स्तुतः इंद्रः अजायत यज्ञे अभि
व्यक्तो ऽभवत् ॥४॥ ॥पंचमी॥ हे अद्रिवः प्राणप्रवर्त्तक विष्णो त्वं गोमतः । मतुपः संबंधमात्रार्थो न विवक्षितः । गोसंबंधिनो बल
स्य मिथ्याज्ञानस्य । वेदवाचामन्यार्थबुद्धेरितियावत् । यद्बिलं मूलकारणं अज्ञानं तत् अपावः अपावृतवानसि । तत्वप्रदर्शनेनोत्सारित
वानसीत्यर्थः ॥ अपपूर्वात् वृञ् वरण इत्यतो लुङ् मध्यमपुरुषैकवचने च्लि प्रत्यये धातोर्गुणे अडागमे छांदसाद्विकरणलोपे संयोगांत
सकारलोपे रेफस्य विसर्गे अपाव इति सिद्धेः । अंतश्च ज्ञानमिथ्याज्ञानयोर्नाशे सति देवाः सत्प्रकृतयः पुरुषाः । अबिभ्युषः । प्रथमार्थे द्वि
तीया । अबिभीवांसः संसारभयोपेताः तुज्यमानाः हृयेन प्रेर्यमाणाश्च त्वां आविषुः । दैत्यैर्दुष्टगिरा बाध्यमानं सद्भिराश्रयरक्षणित्र

पुरां भिंदुर्युवा कविरमितौजा अजायत । इंद्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः ॥ त्वं वलस्य गोमतोऽपावरद्रिवो बिलं ।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ ॥पुरां । भिंदुः । युवा । कविः । अमितऽओजाः । अजायत । इंद्रः । विश्व
स्य । कर्मणः । धर्त्ता । वज्री । पुरुऽस्तुतः ॥ त्वं । वलस्य । गोऽमतः । अप । अवः । अद्रिऽवः । बिलं । त्वां । देवाः । अबिभ्युषः । तुज्यमाना
सः । आविषुः ॥ ॥

प्रकाशितवंत इतियावत् । वलतेर्वर्णपरिवर्तनार्थत्वात्मनसोऽर्थवैपरीत्येन विषयीकरणं वलमिति वलशब्दो विपरीतज्ञानवाची
ध्येयः ॥ यद्वा वलस्यार्थवैपरीत्येन विषयीकुर्वत इत्येवार्थः । ज्ञानस्येति शेषो ध्येयः ॥ पुरंदरपक्षे तु हे अद्रिवः पर्वतछेदक त्वं गो
मतः गोभिर्युक्तस्य + स्या + बलस्य बलस्य पूर्वदैत्यस्य बिलं गिरिकुटाधस्तनविवरं अपावः अपावृतवानसि । तदा देवास्तुज्यमानास्त्वया
प्रेर्यमाणाः अबिभ्युषः अबिभीवांसस्त्वां आविषुः अभीत्येन त्वां परितो जुगुपुरित्यर्थः । अवरक्षणे लुङ् । इंद्रेण गोसंबंधस्थेयं तेक्रूरासु जगति
चरितुं विसृष्टासु गोषु पणयो नाम दैत्याः गोनक्षार्थं नियुक्तां सरमाख्यां देवशुनीं स्वस्य तादिकंभूषाभूतमिवोक्ता प्रलोभ्यतां हित्वा गाः अपहृत्य गि
रेरधस्तनबिले वस्थापितवंतः । इंद्रस्तु पादताडनेन सरमामुखात्सयत्सि निःसृतेसति तत्कृतपयःपानादिव्यापारज्ञानाभयेन रक्षणे गतानामेव दै
त्यानपणिनोस्वकार्त्वं प्रेष्य गोस्थानं ज्ञात्वा दैत्यान्संहृत्य गाः निसार्य गोस्वबारव्ययज्ञमकरोत् । तदा देवाः दैत्यभयोपेतास्त्वां परिवार्य रक्षन्निति भावः ॥
अबिभीभय इत्यस्य वसुप्रत्यये तस्य लिड्वद्भावे द्विर्वचनादौ अबिभीवांस इति रूपं ॥ ॥५॥ ॥

॥इतः परमग्निं दूतमित्यारभ्य कस्य नूनमित्यतः प्राक् एकोनचत्वारिंशादुत्तरशतऋचः। तस्य मेधातिथिर्ऋषिर्ज्ञेयः। अग्निं दूतमिति द्वादशर्चमाग्ने
यं सूक्तं गायत्रीछंदस्कं। अत्राग्निरग्निनामापन्नःसुरामो ज्ञेयः। तत्राद्या॥ विश्ववेदसं' विश्वं वेत्तीति विश्ववेदाः। विदेरसुन्। तं विश्ववेदसं
विज्ञं। अग्नेश्च यथायोग्यं विश्ववेदनं ध्येयं। अस्य प्रमाण प्रमितस्य यज्ञस्य सुक्रतुं यज्ञजातस्य सम्यग्वोढारं' दूतं देवप्रार्थितकारित्वादुप
चारेण दूतं विज्ञं' हविर्भागार्थं देवप्रेष्यहहेतुना दूतं' होतारं अग्निमीळ इत्युक्तं हि राज्ञः तस्य तया होतृनामकं अग्निं वयं वृणीमहे
प्रार्थयामहे इति यावत्॥१॥ ॥द्वितीया॥ ऋत्विजः विशां प्रजानां पतिं विश्पतिं' हव्यं वहतीति हव्यवाट् तं हव्यवाहं' पुरुप्रियं प्रणोस्तुरवं' अग्नि त्रप
मग्निं प्रत्यग्निं' हनेत्रूपबाहुल्यादग्नीनां चानेकत्वात् वीप्सोपपत्तिः। हवीमभिः' ऋग्रूपैराह्वानैः सदा हवंते आह्वयंते आहूतवंत इति॥२॥ ॥

अग्निं दूतं वृणीमहे होतारं विश्ववेदसं। अस्य यज्ञस्य सुक्रतुं॥ अग्निमग्निं हवीमभिः सदा हवंत विश्पतिं। हव्यवाहं पुरुप्रियं॥
अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे। असि होता न ईड्यः॥ तांउशतो वि बोधय यदग्ने यासि दूत्यं। देवैरा सत्सि बर्हिषि॥
घृताहवन दीदिवः प्रति ष्म रिषतो दह। अग्ने त्वं रक्षस्विनः॥ ॥अग्निं। दूतं। वृणीमहे। होतारं। विश्वऽवेदसं। अस्य। य
ज्ञस्य। सुऽक्रतुं॥ अग्निंऽअग्निं। हवीमऽभिः। सदा। हवंत। विश्पतिं। हव्यऽवाहं। पुरुऽप्रियं॥ अग्ने। देवान्। इह। आ। व
ह। जज्ञानः। वृक्तऽबर्हिषे। असि। होता। नः। ईड्यः॥ तान्। उशतः। वि। बोधय। यत्। अग्ने। यासि। दूत्यं। देवैः। आ। स
त्सि। बर्हिषि॥ घृतऽआहवन। दीदिवः। प्रति। स्म। रिषतः। दह। अग्ने। त्वं। रक्षस्विनः॥ ॥

तृतीया॥ हे अग्ने त्वं जज्ञानः जायमानः अस्मद्यज्ञे व्यज्यमानस्त्वं वृक्तबर्हिषे वृक्तं विस्तृतं बर्हिः येन तस्मै वृक्तबर्हिषे यजमानाय देवा
न् इह यज्ञे आवह। यतस्त्वं होतासि नः अस्माकमीड्यश्चासि तत इत्यर्थः॥३॥ ॥चतुर्थी॥ हे अग्ने ईर्यायत् यस्मात् दूत्यं दूतस्य भावं
कर्म वा यासि प्रतिपद्यसे। देवानां प्रार्थितकृत्वेन दूतीयत्वं तस्मादुशतः आगंतुमिच्छतः तान् सुरान् विबोधय। अमुष्य यज्ञे युष्माभिरागं
तव्यमिति विज्ञापय देवैः सह बर्हिषि अत्सत्सि आसीदसि। उपवेक्ष्यसि। सीदतेर्विकरणसीदादेशाभावश्छांदसः॥४॥ ॥पंचमी॥ घृताहव
नं घृतं सुघृतं श्रूयते यत्र यागे हवनं हविर्यस्य तस्य संबुद्धिः हे घृताहवन। नदीदिवः दीदीप्यमान' यङ्लुगंतात् [illegible] दीदिवः अग्ने त्वं
रिषतः हिंसायाः। अंतर्णीतण्यर्थोयं। नाशकान् रक्षस्विनः रक्षांसि येषां संति तिरस्कर्तॄन् संबंधिनः जनान् [illegible] प्रति दह
स्म प्रतिदहैव। दहभस्मीकरणे। नाशयेत्यर्थः॥ ॥५॥ ॥ ॥

षष्ठी॥ यस्यास्ये हविर्हूयते स जुहूः हवनाधिकरणं आस्यमस्येति जुहूसत्याजुह्वास्यः। कविः सर्वज्ञः' गृहाणां पतिः गृहपतिः' युवा तरुणः
अग्निः अग्निना पवनेशेन त्वया संमिध्यते संदीप्तो भवति। अग्न्यादीनां दीप्त्यादिगुणप्रदत्वमिति यावत्। प्रसिद्धाग्निविषये तु जुह्वास्यः
होमाधारत्वादाहवनीयोग्निः अग्निनामथितेन गार्हपत्येनाग्निना समिध्यत इत्यर्थो ज्ञेयः। अन्यत्समानं॥६॥ ॥अत्र सूक्ते प्रथमो वर्गः॥
द्वितीयवर्गे आद्या॥ कविं सर्वज्ञं' सत्याः साधवो धर्माः गुणाः यस्यासौ तथा तं सत्यधर्माणं' अमीवं दुःखं चातयति नाशयति अपसारयति वा
अमीवचातनं दुःखघ्नं अग्निं देवं अध्वरे यज्ञे उपस्तुहि' स्वात्मानं प्रति स्वांतर्यामिणं प्रतिबोधनगं प्रति वोच्यते॥१॥ ॥द्वितीया॥ हे अग्ने देव
यो हविष्पतिः यजमानः दूतं त्वां सपर्यति पूजयति अस्मात्तस्य यजमानस्य प्राविता प्रकर्षेण रक्षिता भव॥२॥ ॥तृतीया॥ देववीतये देवानां वीतये

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड्जुह्वास्यः॥ व० २२॥ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनं॥
यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति। तस्य स्म प्राविता भव॥ यो अग्निं देववीतये हविष्मां आविवासति। तस्मै पावक मृळय॥ स नः
पावक दीदिवोऽग्ने देवाँ इहा वह। उप यज्ञं हविश्च नः॥ स नः स्तवान आ भर गायत्रेण नवीयसा। रयिं वीरवतीमिषं॥ ॥अग्निना।
अग्निः। सं। इध्यते। कविः। गृहऽपतिः। युवा। हव्यऽवाट्। जुहुऽआस्यः॥२२॥ कविं। अग्निं। उप। स्तुहि। सत्यऽधर्माणं। अध्वरे।
देवं। अमीवऽचातनं॥ यः। त्वां। अग्ने। हविःऽपतिः। दूतं। देव। सपर्यति। तस्य। स्म। प्रऽअविता। भव॥ यः। अग्निं। देवऽवीत
ये। हविष्मान्। आऽविवासति। तस्मै। पावक। मृळय॥ सः। नः। पावक। दीदिऽवः। अग्ने। देवान्। इह। आ। वह। उप। यज्ञं। ह
विः। च। नः॥ सः। नः। स्तवानः। आ। भर। गायत्रेण। नवीयसा। रयिं। वीरऽवतीं। इषं॥ ॥

आगमनतत्परा सिद्धफलाय वा। वीगतिप्रजनकांत्यसनखादनेषु इत्यस्मात् क्तिन् प्रत्ययः। यो हविष्मान् यजमानः अग्निं त्वां आवि
वासति आ धत्ते पूजयति च हे पावक त्वं तस्मै तं यजमानं सर्वदा मृळय सुखय॥३॥ ॥चतुर्थी॥ पावक पुनाति पावयतीति पावक।
दीदिवः दीदीप्यमान। हे अग्ने स त्वं नः यज्ञं हविश्च प्रति देवान् उपावह। अध्यात्मं तु इह शरीरे देवान् तत्साभिमानिनः नः अस्माकं हविश्च
प्रति तत्सज्ञानरूपयज्ञादिसिध्यर्थं आवह इत्यर्थः। अन्यत्समानं॥४॥ ॥पंचमी॥ हे अग्ने नवीयसा अतिनूतनेन इदानीमेव व्यज्यमानेन गायत्रेण सा
मा स्तवानः स्तूयमानः स त्वं नोस्मभ्यं रयिं वित्तं वीरवतीं पुत्रसमुन्नोभावप्रधानेन वीर्यसुखां वा इषं अन्नं आभर देहीत्यर्थः। आ भर इति [illegible] करणं

षष्ठी॥ हे अग्ने शुक्रेण शुभ्रेण ज्वलतेतियावत्। शोचिषा ज्योतिषा तेजसा युक्तस्त्वं विश्वाभिः सर्वाभिः देवहूतिभिः देवाह्वानैः सहनः स्मा
कं इमं स्तोमं स्तुतिं जुषस्व जुषीप्रीतिसेवनयोः कृणुतइत्यर्थः॥६॥ द्वादशेसूक्ते द्वितीयो वर्गः॥ ॥सुसमिद्धोन इत्यादि द्वादशर्चमाप्रीसू
क्तं गायत्रीछंदस्कं प्रत्यृर्चभिन्नदेवताकं। ताश्चदेवताः अग्निविशेषादयः तत्राद्या॥ हे होतः पावक अग्ने व्याख्यातपदानि। सुसमिद्धः
सुदीप्तस्त्वं नः हविष्मते अस्मै यजमानाय। तादर्थ्ये चतुर्थी। देवान् आवह। आहूय यक्षि च यज च। यजतेर्व्यत्ययेन लुग्विकरणं शिपः
कुत्सवह देवानावहेति बहुवारोक्तिः शादनार्था॥१॥ ॥द्वितीया॥ तनूनपादित्यग्निविशेषनाम। विद्वांस्तनूनपात् व्यस्य पोत्रपर्या
यहात्तनुभ्यो देहेभ्यो जातया वाचाव्यज्यमानत्वेन तनूनपादितिनामज्ञेयं। हे कवे तनूनपात् त्वं वीतये जेयमानस्य देवताप्रास्यर्थं नः अ

अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः। इमं स्तोमं जुषस्व नः॥ २०२३॥ सुसमिद्धोन आवह देवां अग्ने हविष्मते।
होतः पावक यक्षि च॥ मधुमंतं तनूनपाद्यज्ञं देवेषु नः कवे। अद्याकृणुहि वीतये॥ नराशंस मिह प्रियमस्मिन्यज्ञ उ
पह्वये। मधुजिह्वं हविष्कृतं॥ अग्ने सुखतमे रथे देवां ईळित आवह। असि होता मनुर्हितः॥ ॥अग्ने। शुक्रेण। शो
चिषा। विश्वाभिः। देवहूतिऽभिः। इमं। स्तोमं। जुषस्व। नः॥ २३॥ सुऽसमिद्धः। नः। आ। वह। देवान्। अग्ने। हविष्मते।
होतरिति। पावक। यक्षि। च॥ मधुऽमंतं। तनूऽनपात्। यज्ञं। देवेषु। नः। कवे। अद्य। कृणुहि। वीतये॥ नराशंसं। इह।
प्रियं। अस्मिन्। यज्ञे। उप। ह्वये। मधुऽजिह्वं। हविःऽकृतं॥ अग्ने। सुखऽतमे। रथे। देवान्। ईळितः। आ। वह। असि। होता। म

स्मदीयं मधुमंतं मधुस्वादुयुक्तं हविरादि तद्वंतं यज्ञं अद्येदं देवेषु कृणुहि। कुरु देवान् प्रापय॥२॥ ॥तृतीया॥ इह सर्वप्राणि
नां प्रियं मधुमती जिह्वा यस्य तं मधुजिह्वं हविष्कृतं हविष्कर्तारं नराशंसं। शंसस्तुतौ। नरैराशंस्यतयानराशंसनामकं अग्निवि
शेषं हरिं च अस्मिन्यज्ञे उपह्वये आह्वयामि॥३॥ ॥चतुर्थी॥ हे अग्ने ईळितः स्तुतः त्वं सुखतमे रथे सुखतमेन रथेन अतिश
येन सुखकारिणा रथेन देवानावह। यस्मात्त्वं होतासि मनुर्हितः मनुशब्दपर्यायो च मनुष्यशब्दः। मनुष्याणां मनुष्येभ्यः हितश्चासि। अ
ध्यात्मं तु देवाः इंद्रियाभिमानिनः। रथो देहः। तत्रयथाश्रुतेवसप्तमी॥ अन्यत्समानं॥४॥ ॥

षष्ठी॥ हे शूर इंद्र अहं तवरातिभिः दानैर्निमित्तैः सिंधुं यज्ञदीक्षार्थं उदयाभिविशेषः नदीं प्रस्थाय प्रस्थागमं। आगत्य पुनरावदन् स्तुतिं से
वे रपदेक्षांसम्यक् स्तुवं श्रुजातोस्मि। यद्वा सर्वदा त्वामावदन् अहं सिंधुं प्रस्थाय स्थितियोऽना॥ हे गिर्वणः गिरां संभजनीय वेदगिरो दित। त
स्यते। द्वितीयार्थे षष्ठी। तं त्वां ये विदुः ते कारवः कर्तारः ऋत्विजः ते त्वामुपतिष्ठंत। मंत्रैस्त्वामपूजयन्। उपान्मंत्रकरण इत्युपपूर्वस्य तिष्ठतेरा
त्मनेपदं। शुष्णमादित्वाद्विदुष्ट इतिषत्वं॥६॥ ॥सप्तमी॥ हे इंद्र त्वं मायिनं कुत्सितमंतं। व्रीह्यादिभ्यश्चेति मायाशब्दादिनि प्रत्ययः। शुष्णं
शोषकं। शुष्क शोषण इत्येतेन त्रपणं। वृत्रमितियावत्। अध्यात्मं तु तमो ज्ञेयं। मायाभिः शक्तिभिः अवातिनः इनवध इत्येतो लङ्। ह

तवाहं शूर रातिभिः प्रत्यायं सिंधुमावदन्। उपातिष्ठंत गिर्वणो विदुष्टे तस्य कारवः॥ मायाभिरिंद्र मायिनं
त्वं शुष्णमवातिरः। विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर॥ इंद्रमीशानमोजसाभि स्तोमा अनूषत। सह
स्रं यस्य रातय उत वा संति भूयसीः॥ २१॥ ॥सूक्तं ११॥ ॥तव। अहं। शूर। रातिऽभिः। प्रति। आयं। सिं
धुं। आऽवदन्। उप। अतिष्ठंत। गिर्वणः। विदुः। ते। तस्य। कारवः॥ ॥मायाभिः। इंद्र। मायिनं। त्वं। शुष्णं।
अव। अतिरः। विदुः। ते। तस्य। मेधिराः। तेषां। श्रवांसि। उत्। तिर॥ ॥इंद्रं। ईशानं। ओजसा। अभि।
स्तोमाः। अनूषत। सहस्रं। यस्य। रातयः। उत। वा। संति। भूयसीः॥ ॥वर्ग २१॥ ॥

त्वानसि। किं च ये मेधिराः मेधावन्तः। तृतीयवर्णस्यातिशायार्थत्वात् अ आ इ ई इत्येवं ह्रस्वापेक्षया ईकारस्य तृतीयत्वात्। तस्य ते तं
त्वां विदुः तेषां श्रवांसि श्रूयंत इति कर्मव्युत्पत्त्या विद्याः उत्तिर उच्चैस्तरां देहि॥ ॥७॥ ॥अष्टमी॥ यस्य इंद्रस्य सहस्रं उत वा
ततोपि भूयसीः भूयस्यः रातयः दानानि संति। तमीशानमिंद्रं त्वां ओजसा ओजः प्रभृतिभिर्गुणैः सह स्तोमाः स्तुतिविशेषाः अ
भ्यनूषत सदा स्तुवंति। णुस्तुतौ लुङ आत्मनेपदि प्रथमपुरुषबहुवचनं॥ ॥८॥ ॥इत्येकादशं सूक्तं॥११॥ तृतीयोऽनुवाकः॥

पंचमी॥ हे मनीषिणः बुद्धिमंतो ऋत्विजः यत्रस्थाने अमृतस्य देवतासमुदायस्य चक्षणं दर्शनं भवति। चक्षिङः ख्याञादेशाभावश्छांद
सः। छंदस्युभयथेति ल्युटः सार्वधातुकत्वेन वा चक्ष दर्शन इति धातोर्ल्युटं वा। तत्तु घृतपृष्ठं घृतस्थानात्पश्चिमतो वर्तमानं देवस्था
नं देवस्थाने आनुषक् सर्वतः। बर्हिः स्तृणीत विस्तारयत। अध्यात्मं तु। घृतपृष्ठं घृतः शुभ्रो विष्णुः पृष्ठे उपरिभागे यस्य तत्
घृतपृष्ठमित्यर्थः। हे मनीषिणः देवाः अत्र मनसि अमृतस्य मतिहीनस्य विष्णोश्चक्षणं भवति घृतपृष्ठं तत्र घृतपृष्ठं यत्र मनसि वृ
हता बर्हिः शब्दितं वेदवाक्यं स्तृणीत तेन मनः संयोजयतेति॥५॥ ॥षष्ठी॥ ऋतवृधः ऋतरूपेण यज्ञार्थं ज्ञानरूपेण हरिणा वृधः वृधा
असश्चतः संगहीनाः। सश्चतेः संगार्थः क्विप्। नुस्वश्चेगुक्। द्वारो देवीः द्वारो देव्यः श्रियो दास्यः अद्य अस्मिन्नहनि नूनं निश्चितं अ
वैवेति यावत्। यष्टवे यष्टुं यजनरूपप्रयोजनाय नोमानस्य यज्ञे बाह्ययज्ञे वा विश्रयंतां वर्ततां। यद्वा ऋतवृधः ज्ञानरूपा देहस्याश्रेतिऋत

स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः। यत्रामृतस्य चक्षणं॥ विश्रयंतामृतावृधो द्वारो देवीरसश्चतः। अद्यानूनंच
यष्टवे॥ व०२४॥ नक्तोषासा सुपेशसास्मिन्यज्ञ उपह्वये। इदं नो बर्हिरासदे॥ ॥स्तृणीत। बर्हिः। आनुषक्। घृतऽपृष्ठं।
मनीषिणः। यत्र। अमृतस्य। चक्षणं॥ वि। श्रयंतां। ऋतऽवृधः। द्वारः। देवीः। असश्चतः। अद्य। नूनं। च। यष्टवे॥ २४॥
नक्तोषसा। सुऽपेशसा। अस्मिन्। यज्ञे। उप। ह्वये। इदं। नः। बर्हिः। आऽसदे॥ ॥

वृधः द्वारः मुमुक्षूणां साक्षाद्द्वारभूताः सर्वतः संगहीनत्वेनासश्चतः देवीः देव्यः कीर्त्यादिगुणोपेताः भगवतः स्त्रीरूपविशेषाः अ
द्य नूनं अद्यैव यष्टवे नो बाह्याभ्यंतरयज्ञे विश्रयंतां वर्ततामित्यर्थः। अत्र प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादित्सत्रोक्तदिशा ध्यव
धानेन स्तुतिहेतुत्वरूपस्त्रीत्वस्यप्रभावेन स्त्रीलिंगत्वं। गुहां प्रविष्टावित्यादावुक्तदिशा रूपबाहुल्येन बहुवचनं। फलमत उपपत्तेरित्य
त्रोक्तन्यायेन भगवत एव मुख्यमोक्षसाधनत्वं चोपपादनीयं॥ नयोदशोस्य सूक्ते प्रथमो वर्गः॥ ॥द्वितीयवर्गे आद्या। सुपेशसा सु
पेशसौ शोभनरूपयुक्तौ नक्तोषसा नक्तोषसौ रात्र्युषःकालाभिमानिदेवते पापाद्यसंगत्वप्रकाशनरूपनिमित्ताभ्यां नक्तोषःश
ब्दितभगवद्रूपविशेषौ वा नः अस्माकं अस्मिन्यज्ञे इदं बर्हिः अस्मिन्बर्हिषि आसदे आसादनाय। संपदादित्वाद्भावे क्विप्। संस्थि

सेउपह्वयेउपह्वयामि।अंजुव्यक्ति   कांतिगतिष्विस्यतः क्तप्रत्ययेअनिदितांहलउपधायाः।क्ङितीतिनलोपेन समासेत्राके ध्वादित्वेन परत्रूपेन क्तेतिषिस्थवर्थपक्षेव्युत्सर्जिज्ञेया।तथावत्राकांतावित्यथः क्वसुन्प्रत्ययेग्रहिज्येतिसंप्रसारणेपूर्वरूपेषतेचउषा इतिरूपं।स्त्रीत्वंप्राग्वत्सिद्धितं॥१॥   ॥द्वितीया॥सुजिह्वौशोभनाजिह्वाययोस्तौ।कवीसर्वज्ञौ।दैव्यादेव्यौ इतत्वेनदेवसंबंधिनौ। गार्हपत्याहवनीयौतद्रूतविरुद्धरूपविशेषौच।उपह्वये।आगत्यचतौनः अस्मदीयंइमंयज्ञंदेवेषुसदायजतांप्रयच्छतामित्यर्थ जतेर्लेटिअडागमशिपक्तवषतानि॥२॥   ॥तृतीया॥इळाईडयतहेतुनाइळाश्रीः।ईडस्तुताविक्यक्षतां+त्यतः अकारप्रत्यय टाप्रत्ययौ।ईकारस्यह्रस्वता।सरस्वती ब्रह्माणी।व्युत्पादितमतत्पुरस्तात्सावकानः सरस्वतीसत्र।मही महत्वेनहेतुनामहीयुक्ता

तासुजिह्वाबुपह्वयेहोतारादैव्याकवी।यज्ञंनोयक्षतामिमं॥इळासरस्वतीमहीतिस्रोदेवीर्मयोभुवः।बर्हिःसीदंतस्त्रिधः॥ इहत्वष्टारमग्नियंविश्वरूपमुपह्वये।अस्माकमस्तुकेवलः॥अवसृजावनस्पतेदेवदेवेभ्योहविः।प्रदातुरस्तुचेतनं॥   ॥
॥ता।सुजिह्वौ।उप।ह्वये।होतारा।दैव्या।कवीइति।यज्ञं।नः।यक्षतां।इमं॥इळा।सरस्वती।मही।तिस्रः।देवीः।मयःऽ भुवः।बर्हिः।सीदंतु।अस्त्रिधः॥इह।त्वष्टारं।अग्नियं।विश्वऽरूपं।उप।ह्वये।अस्माकं।अस्तु।केवलः॥अव।सृज। वनस्पते।देव।देवेभ्यः।हविः।प्र।दातुः।अस्तु।चेतनं॥   ॥

श्रियोपरत्नपात्निकाभ्रदेवींवायुभार्याभारतीवा।एतत्त्रिस्थाइळाद्दिनामानोभगवद्दीयस्त्रीरूपविशेषाश्च मयोभुवः सुखाश्रयभृ ताः।अस्त्रिधःअविनाशाः।तिस्रःदेवीदेव्यः।देवशब्दार्थउक्तो।ऽग्निमीळइत्यत्र।बार्हिः बार्हि।विसीदंतुउपविशंतु॥३॥   ॥चतुर्थी॥त्व ष्टारंतेजस्विनंबलवंतंवा।त्विषदीप्तावित्यनस्त्तनुप्रत्ययः।उपधायाअकारः अनिट्कृत्।अग्नियंअग्रेभवंप्रधानं।अग्रशब्दात्घप्रत्ययः। विश्वरूपं।विश्वानिरूपाणिवस्तूनियस्मादितिव्युत्पत्यादिविश्वरूपकर्त्तारं।विश्वंपूर्णंरूपंयस्येतिवाविश्वरूपं।इहयज्ञेउपह्वये।सत्वमस्माकं केवलोस्तुअस्माकमेवपालयितास्त्वित्यर्थः।प्रसिद्धसष्टरिअग्ग्रत्वादियथायोग्यंध्येयं॥४॥   ॥पंचमी॥हेवनस्पते वनेसांवनानांवाभज नीयानांवापते।कर्मण्यसुन्अकारप्रत्ययोवा।तत्पसिपारस्करादित्वेसमासेसुडागमः।देवैःहंदेवेभ्योहविरवसृजदेहि।तेनचप्रदातुःयजमानस्य

तुः

चेतनंज्ञानमस्तु।चितीसंज्ञानेभावेल्युट्॥५॥   ॥

तृतीया॥ इंद्रवायू भगवतिकृतवृत्यारनाबिमोशब्देवाय्वयायाहि इंद्र आयाहीत्यत्र। बृहस्पतिः सौपतिश्चेतिवा बृहत्याः वाचः पतिमि
तिवा बृहस्पतिं। तद्बृहतोश्चोरदेवतयोः करपस्योः सुट् तलोपश्चेतितलोपसुडागमौ। तथाचकाण्वश्रुतिः एषउएवबृहस्पतिर्वाग्घिबृ
हतीतस्याएषपतिस्तेनेति। मित्रं मित्रो। साहचर्याद्वरुणोमित्रशब्देनगृह्यते। दृश्यतेयेकनाम्नाद्वयोरुक्तिस्तदत। मित्रेहुवइत्यत्रमित्रा
वरुणशब्दावपिनिरुक्तौ। अग्निं। पूषयतिपूर्णाद्वापूषणं। पुषपुष्टाविस्यैतोण्यर्थान्निर्भावनंतर्भावाभ्यांकनिन्प्रत्ययेउपधादीर्घतं।
भर्गसमग्रैश्वर्यादिरूपं आदित्यसुतात्पृथिवीरसमाददातीतिवाहितोरादित्यान्। रूपबहुत्वाद्बहुवचनं। आद्येर्थे अव्ययात्यवित्यत्र
योगविभागादाद्दिपक्षात्त्यप्। आङ्पूर्वात्दाण्दानइत्यतोडप्रत्ययेटिलोपेआदितइतिभवति। यद्वाप्रापणइत्यतः अकारप्रत्ययेआ
कारलोपेयइतिरूपं। आदित्याःसौयश्चेतिआदित्यइतिविग्रहः। तथाहिश्रुतिः एतेहीदंसर्वमाददानायंतीति। माभिः वेदप्रमाणेः

इंद्रवायूबृहस्पतिं मित्राग्निंपूषणंभगं। आदित्यान्मारुतंगणं॥ प्रवोभ्रियंत इंदवोमत्सरामादयिष्णवः। द्रप्सा
मध्वश्चमूषदः॥ ॥इंद्रवायू इति। बृहस्पतिं। मित्रा। अग्निं। पूषणं। भगं। आदित्यान्। मारुतं। गणं॥ ॥
प्र। वः। भ्रियंते। इंदवः। मत्सराः। मादयिष्णवः। द्रप्साः। मध्वः। चमूऽसदः॥ ॥

रुतंप्रतिपादितमितिमारुतं। रुशब्दे क्तप्रत्ययः। गणं समूहं। अहूषतेत्यनुवृत्यान्वयः॥३॥ ॥चतुर्थी॥ हे देवाः मत्सराः मद
कारिणः। मत्समदंसनंतिअंतर्णीतणिचर्थः सारयंतीतिवा सत्तेः। मत्पूर्वात्सृगताविस्यतोऽकारप्रत्ययः। मादयिष्णवः मद
करणशीलाः। ण्यंतान्मदिहर्षइत्यतोणेश्छंदसीतिरती लाधेरिष्णुप्रत्ययः। द्रप्साः द्रवणरूपाः। द्रुगताविस्यतोप्सप्रत्ययः। उ
कारस्याकारः। मध्वः मधवः। यणादेशः। स्वादवः। चमूषदः चर्म्या चमसेसीदंतीतितथा। चमसस्थाः। इंदवः सोमाः वः युष्मद
र्थं प्रभ्रियंतेसंपाद्यंते। तान्पिबतेत्यन्वयः। अध्यात्मंतु हे देवाः मत्सराः मदकारिणः मादयिष्णवः मदकरणशीलाः द्रप्साः कंबलाः म
ध्वः मधवः चमूषदः शिरोलक्षणचमसेस्थिताः। ताएताः प्राणश्रियः श्रिताश्चक्षुः श्रोत्रंमनोवाक्प्राणइतिश्रुतेर्मनसः शिरःस्था
नकत्वात्। इदंतच्छिरएषह्यर्वाग्बिलश्चमसइतिश्रुत्याचमूशब्देनचमसः शिरोज्ञेयः। इंदवः इकारस्यकामवाचित्वात् इंकामं इष्टं ददती

तींदवः मनोवृत्तयः वः अर्थेभ्रियंतेसमाधीयंतइत्यर्थः॥ ॥४॥ ॥

पंचमी॥ हे देवाः हविष्मंतः अवस्यवः अवनमात्मनइच्छंतीत्यवस्यवः। क्युच्छंदसीतिक्युप्रत्ययः। वृक्तबर्हिषः विस्तृतबर्हिषः अरंकृ
ताः अरंअलंकर्तारः अतिशयेनकर्मणांकर्तारः। अलंकृताः भूषयितारइतिवा। लकारस्यरेफादेशः। कण्वासः कण्वाः वयमिति
यावत्। अस्मदोद्वयोश्चेकस्मिन्नपिमेधातिथौबहुवचनं। कण्वप्रभृतीनांबहुत्वा। मृषिताःकण्वप्रभृतयइतिवार्थः। ह्वां ईळते स्तुवंति
ईडस्तुतौ। उस्यलश्छंदसि॥५॥ ॥षष्ठी॥ हे अग्ने घृतपृष्ठाः घृतमिवस्निग्धंपृष्ठंयेषामितिवा घृतःस्रुषः हरिः पृष्ठेयेषामिति
वा। निर्दोषहरिणास्समाच्छादइतियावत्। मनोयुजः स्वान्येमनोमात्रेणरथेयोज्याः वाहकत्वाद्वन्हयः। वहतेर्निः। अश्वाः सोमपीत
येत्वांदेवांश्चयज्ञंप्रत्यावहंति। यइत्यस्यउत्तरमंत्रेऽन्वयः॥६॥ ॥चतुर्दशोसूक्ते प्रथमो वर्गः॥२६॥ ॥द्वितीयवर्गे आद्या। हे अ

ईळतेत्वामवस्यवः कण्वासोवृक्तबर्हिषः। हविष्मंतो अरंकृताः॥ घृतपृष्ठा मनोयुजोयेत्वावहंतिवन्हयः। आदेवान्
सोमपीतये॥२६॥ तान्यजत्राँ ऋतावृधोग्नेपत्नीवतस्कृधि। मध्वः सुजिह्वपायय॥ येयजत्रायईड्यास्तेतेपिबंतु
जिह्वया। मधोरग्नेवषट्कृति॥ ॥ईळते। त्वां। अवस्यवः। कण्वासः। वृक्तऽबर्हिषः। हविष्मंतः। अरंऽकृताः॥
घृतऽपृष्ठाः। मनःऽयुजः। ये। त्वा। वहंति। वन्हयः। आ। देवान्। सोमऽपीतये॥२६॥ ॥तान्। यजत्रान्। ऋ
तऽवृधः। अग्ने। पत्नीऽवतः। कृधि। मध्वः। सुऽजिह्व। पायय॥ ये। यजत्राः। ये। ईड्याः। ते। ते। पिबंतु। जिह्व
या। मधोः। अग्ने। वषट्ऽकृति॥ ॥

नेयएवंविधाअश्वाः तेः यजत्रान् विश्वंयजतः स्तोतॄनितिवा। ऋतवृधः ऋतेनसम्यग्ज्ञानरूपेणहरिणाएधितान् तान्देवा
न् पत्नीवतः कृधिकुरु। यज्ञंप्रत्यागतान्पत्नीभिः सहयोजय। पत्नीसहितानुकूललक्षणेनश्वेरिहानयेतिभावः। आनीय
चेहसुजिह्व मध्वः मधुस्वादुसोमंपायय॥ विष्णुपक्षेतुयजत्रानितिकर्मणि इज्यानितिव्याख्येयं॥१॥ ॥द्वितीया॥ हे अग्ने य
जत्राः यजंतः पूर्ववदिज्याइतिवा। ईड्याः स्तुत्याः येयेदेवाः संति तेते सर्वे वषट्कृति। संपदादित्वाद्भावेक्विप्। वषट्कृतौसत्यांतेतव
स्वीययाजिह्वयामधोः मधुपिबंतु। अत्रद्वितीयस्तइतिशब्दः षष्ठ्यंतः अनुदात्तत्वात्। आद्यः प्रथमांतः द्विरावर्ततइतिज्ञेयं॥२॥ ॥

तृतीया॥ होता विप्रः अग्निः उषर्बुधः प्रकाशात्मकापहाबुधो बलं तद्बुध्यंत इत्युषर्बुधः अलाविदः। तान् विश्वान् देवान् सोमपान् सूर्यस्य
रोचनात् सूर्यसंबंधेनाति प्रकाशमानात् तेन रोचनपदोक्तस्वर्गात् इह यज्ञे प्रति आकीं वक्षति आवहतु। आकीमित्याद्यर्थे निपातः।
वहतेर्लेटि वक्षतीति रूपं॥३॥ ॥चतुर्थी॥ हे अग्ने मित्रस्य धामभिः। मित्रं हुव इत्यचोक्तदिशा मित्रनाम्नो विष्णोः धाम
भिः अधिष्ठानभूतैः विश्वेभिः विश्वैः देवैः इंद्रेण वायुना च सह सोम्यं सोमरूपं मधु पिब। इंद्रवाय्वोः प्राधान्यात् पृथगुक्तिः।
॥४॥ ॥पंचमी॥ हे अग्ने मनुर्हितः होता त्वं यज्ञेषु सीदसि यज्ञानामधिष्ठाता भवसि। तस्मात् स त्वं नः इमं अध्वरं यज देवेभ्यो

आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः। विप्रो होतेह वक्षति॥ विश्वेभिः सोम्यं मध्वग्न इंद्रेण वायुना। पिबा मित्र
स्य धामभिः॥ त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि। सेमं नो अध्वरं यज॥ युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः। ताभिर्दे
वाँ इहा वह॥ व०२७॥ सू०१४॥ ॥इंद्र सोमं पिब ऋतुना त्वा विशंत्विंदवः। मत्सरासस्तदोकसः॥ ॥आकीं। सूर्यस्य।
रोचनात्। विश्वान्। देवान्। उषःऽबुधः। विप्रः। होता। इह। वक्षति॥ विश्वेभिः। सोम्यं। मधु। अग्ने। इंद्रेण। वायुना।
पिब। मित्रस्य। धामऽभिः॥ त्वं। होता। मनुःऽहितः। अग्ने। यज्ञेषु। सीदसि। सः। इमं। नः। अध्वरं। यज॥ युक्ष्व।
हि। अरुषीः। रथे। हरितः। देव। रोहितः। ताभिः। देवान्। इह। आ। वह॥२७॥ ॥इंद्र। सोमं। पिब। ऋतुना।
आ। त्वा। विशंतु। इंदवः। मत्सरासः। तत्ऽओकसः॥

दह। सोचिलोपे चेत्पादपूरणमिति सिमिति साधु॥५॥ ॥षष्ठी॥ हे अग्ने देव त्वं रथे अरुषीः अरुणाः अग्निसप्रभाः
अश्वतर्यः युक्ष्व संयोजय। अथवा अरुषीः लोहिताः अश्वाः अश्वयुक्ष्व। हरितो हरिद्वर्णाः दूर्वासप्रभाः अश्वतरीश्च युक्ष्व। रो
हितो रोहिन्मृगीर्वा युक्ष्व। ताभिरश्वतरीभिः रोहिद्भिर्वा युक्तेन रथेन देवानिह यज्ञे आवह॥ ॥चतुर्दशं सूक्तं॥१४॥ ॥वर्ग२७॥
इंद्र सोममित्याद्यपि द्वादशर्चं सूक्तं ऋतव्यं। अत्रांतरे देवताभेदस्तत्र तत्र द्रष्टव्यः॥ तत्राद्या॥ हे इंद्र गतिहेतुना गतिहेतुत्वेन निमित्तेन ऋ
तुशब्दितेन मार्गेण गहेतियावत्। ऋतुना पुष्पोद्भवादिमासलिंगावगतिहेतुत्वहेतुना ऋतुनामक ऋतुदेवतया सह ऋतुनोलक्षणया

षष्ठी॥ स्वं स्वीयं भागं प्रति आजिहीते आगच्छतीति वा सुहु आ समंतात् हीयते केनापि नापह्नीयत इति वा स्वाहेत्युक्तः स्वीयः यज्वनः
यजमानस्य गृहे वर्तमानं यज्ञं इंद्राय कृणोतन करोतु। इंद्रं प्रापयतेतियावत्॥ तप्तनप्तनथनाश्चेति लुडस्य तन आदेशः। स्वाहाका
रं यजतीति वाक्ये कोऽत्तमप्रयाजस्य यज्ञे स्वाहायक्ष्यमाणा। न तत्रेंद्रसंबंधोस्तीति मते इंद्राय इंद्रस्य संबंधियज्वनो गृहे वर्तमा
नं यज्ञं कृणोतन प्रवर्तयथ इति योजना। किं च तत्र यज्ञे देवान् उपह्वये। स्वाहेत्यस्याद्यर्थे स्वशब्दे कर्मण्युपपदे आङ्पूर्वात् ओहा
ङ् गताविस्मतः कर्तर्यकारप्रत्ययः। स्त्रियां टाप्। द्वितीये तु सु आङ्पूर्वात् ओहाक् त्यागे इत्यतः कर्मण्यकारप्रत्यये टाप्। तृतीये तु
आङ्पूर्वात् हृञ् हरणे इत्यतो डप्रत्यये टाप्। प्रसिद्धस्वाहायां यथायोगमवयवार्थो ज्ञेयः॥ ॥त्रयोदशो सूक्ते द्वितीयो वर्गः॥ वर्ग२९॥

स्वाहा यज्ञं कृणोतनेंद्राय यज्वनो गृहे। तत्र देवाँ उप ह्वये॥ व०२५॥ सू०१३॥ ॥ऐभिरग्ने दुवो गिरो विश्वेभिः
सोमपीतये। देवेभिर्याहि यक्षि च॥ आ त्वा कण्वा अहूषत गृणंति विप्र ते धियः। देवेभिरग्न आ गहि॥ ॥१॥
स्वाहा। यज्ञं। कृणोतन। इंद्राय। यज्वनः। गृहे। तत्र। देवान्। उप। ह्वये॥२५॥ ॥आ। एभिः। अग्ने। दुवः।
गिरः। विश्वेभिः। सोमऽपीतये। देवेभिः। याहि। यक्षि। च॥ ॥आ। त्वा। कण्वाः। अहूषत। गृणंति। विप्र।
ते। धियः। देवेभिः। अग्ने। आ। गहि॥ ॥

॥ऐभिरग्न इत्येतद्द्वादशर्चं वैश्वदेवं सूक्तं॥ तत्राद्या॥ हे अग्ने दुवः सर्वकामदोग्धारः दुह प्रपूरण इत्यतो उ प्रत्ययः। अस्मदीयाः
स्तुतिरूपाः गिरः प्रति सोमपीतये एभिः प्रसिद्धैः विश्वेभिः विश्वैर्देवैः सह आयाहि। आगत्य यक्षि च यज च॥१॥ ॥द्वितीया॥ हे विप्र
मेधाविन्। विप्रासो वा धियायव इत्युक्तेः। अग्ने कण्वाः कण्वसंबंधिनः वयमितियावत्। त्वां आहूषत आहूतवंतः। हे अत्राद्वे ल
ह्। ते तव धियो बुद्धीः गृणंति स्तुवंति। हमतिरायितबुद्धिमानसीत्यादिरूपेण स्तुवंतीत्यर्थः॥ सर्वैर्देवेभिः देवैः सह आगहि आ
गछ। इषुगमियमां छः इति गमेश्छादेशाभावे अनुनासिकलोपे रूपं॥ भाष्यकृद्व्याकृतेयमृक्॥२॥ ॥

ऋतुसंबंधिपात्रेण सोमं पिबेति ऋतुशब्दस्यार्थत्रयं ॥ उच तावित्यस्मात् करणेऽसुन्प्रत्ययः । तदोकसः । तत् ऋतुपात्रं ओको येषां
ते तदोकसः ऋतुपात्रस्थाः । मत्सरासः प्राग्वत् । इंदवः सोमाः त्वामाविशंतु त्वदुदरस्था भवंतु ॥१॥ ॥द्वितीया॥ हे मरुतः ऋ
तुना प्राग्वत् । पोत्रात् पावनहेतुना पोतृदेवताकहेतुना च पोतृनामकानां भवतां संबंधिपात्रात् । तृतीयार्थे पंचमी । पोतृपात्रेण पि
बत । सोममिति शेषः । पीत्वा च यज्ञं पुनीतन पावयत । तप्तनप्तनथनाश्चेति तनादेशः । तत्र च यूयं हि यस्मात् सुदानवः
शोभनदानशीलाः स्थ । ददातेर्नुः । तस्माद्दक्षिणमंतं दत्तेत्यभिप्रायः । ष्ठेति पुषादित्वात् षत्वं ॥२॥ ॥तृतीया॥ हे नेष्टः नेष्टृ
हेतुना नेष्टः ऋत्विग्देवताकहेतुना च नेष्टृपदोक्तधिष्ण्या इंद्र अग्ने त्वष्टर्वा । नयतेस्तृगिति तृनुगागमश्च ष्टुत्वं गुणः । ग्ना

मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥ अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना ।
त्वं हि रत्नधा असि ॥ अग्ने देवाँ इहा वह सादया योनिषु त्रिषु । परि भूष पिब ऋतुना ॥ ॥ मरुतः । पिबत ।
ऋतुना । पोत्रात् । यज्ञं । पुनीतन । यूयं । हि । स्थ । सुऽदानवः ॥ अभि । यज्ञं । गृणीहि । नः । ग्नाऽवः । नेष्टरिति ।
पिब । ऋतुना । त्वं । हि । रत्नऽधाः । असि ॥ अग्ने । देवान् । इह । आ । वह । सादय । योनिषु । त्रिषु । परि । भू
ष । पिब । ऋतुना ॥ ॥

वः गमनशीलत्वात् ग्नाः नद्यः । गमेर्ये डु लुङ् डित्त्वं । ग्नाः यस्य संति स ग्नावान् तस्य संबुद्धिः ग्नावन् । मतुवसो रुः संबुद्धौ
छंदसीति रुः । ग्नावः नदीदेवीभिः सहित । ऋतुना प्राग्वत् । पिब । सोमं पीत्वा नो यज्ञमभिगृणीहि साधुरयमिति प्रशंसावाक्यं ब्रूहि ।
त्वं हि यस्मात् रत्नधाः रतिधारकोसि । रत्नधातममित्यत्र व्याख्यातमेतत् । तस्मादस्मभ्यं रतिं देहीति भावः । विष्टोलु नविधे
ते देष्टादेशितायस्यासी नेष्टा स्वेवं व्युत्पन्नं तं संबुध्येय ॥३॥ ॥चतुर्थी॥ हे अग्ने देवान् इह यज्ञे आवह । आगतांश्च त्रिषु त्रिसंख्याकेषु
योनिषु स्थानेषु उत्तरवेदिसदः प्राग्वंशेषु सादय उपवेशय । देवोपवेशनानंतरं नो यज्ञं परिभूषय । पिब ऋतुनेत्युक्तार्थं ॥ ॥४॥ ५

पंचमी॥ हे इंद्र त्वं राधसः राधसोर्थे इष्टसिध्यर्थं ऋतूननु ऋतुदेवता अनु। ऋतुदेवताभिः सहेति यावत्। ब्राह्मणात् ब्रह्मेति ब्राह्मणाछंसिपात्र
णा सोमं पिब। हि यस्मात् तव तत् तवैव सख्यं अस्तृतं अछिन्नं तस्मादस्मत्सख्यात्वं सोमं पिबेति॥५॥ ॥षष्ठी॥ हे मित्रावरुणौ धृतं व्रतं जग
द्रक्षणादिकं कर्म याभ्यां तौ धृतव्रतौ युवं युवामेव ऋतुपात्रेण सोमं पीतेतिशेषः। ऋतुदेवतया सहेति यावत्। दुलभं दुर्लभं अस्तृत्यं स्वक
र्मणि निष्ठितं दक्षं दक्षाख्यं यजमानं यज्ञं च आशाथे नियमयतः। ततस्तदीयसोमपानेन प्रसन्नौ पुनस्तं प्रवर्तयत इति भावः। अत्र धृ
तव्रतेत्यादौ संहितायां ह्रस्वत्वं दीर्घत्वं तयापदद्वे दस्तृयोरैक्य द्योतनाय। तत्रैक्यं विष्णुरूपयोः स्वरूपैक्यं मित्रावरुणयोस्तु मत्यैक्यं

ब्राह्मणादिंद्र राधसः पिबा सोममृतूँरनु। तवेद्धि सख्यमस्तृतं॥ युवं दक्षं धृतव्रत मित्रावरुण दूळभं। ऋतुना यज्ञ
माशाथे॥ व०२८॥ द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते॥ द्रविणोदा ददातु नो वसूनि या
नि शृण्विरे। देवेषु ता वनामहे॥ ॥ब्राह्मणात्। इंद्र। राधसः। पिब। सोमं। ऋतून्। अनु। तव। इत्। हि।
सख्यं। अस्तृतं॥ युवं। दक्षं। धृतऽव्रता। मित्रावरुणा। दुःऽदभं। ऋतुना। यज्ञं। आशाथे इति॥२८॥ ॥
द्रविणःऽदाः। द्रविणसः। ग्रावऽहस्तासः। अध्वरे। यज्ञेषु। देवं। ईळते॥ द्रविणःऽदाः। ददातु। नः। वसू
नि। यानि। शृण्विरे। देवेषु। ता। वनामहे॥ ॥

ज्ञेये॥६॥ अत्र सूक्ते प्रथमो वर्गः॥२८॥ ॥द्वितीयवर्गे आद्या॥ द्रविणोदाः होता द्रविणसः होतृकाम्य अध्वरे अध्वरेषु। अ
ग्निर्यं यज्ञमध्वरमित्यत्र ध्रुत्वादितमेतत्पदं। यथाविध्यनुष्ठितेषु यज्ञेषु ग्रावहस्तासः सोमसवनार्थं ग्रावहस्ताः संतः देवं द्विजाः
अग्निभिः सहितं प्रधानाग्निं चर्ई ळते स्तुवंति॥१॥ ॥द्वितीया॥ द्रविणोदाः होतृदेवतात्वादग्निरत्र द्रविणोदा आह्यः। यानि वसूनि शृण्वि
रे श्रूयंते। प्रसिद्धानीति यावत्। तानि नः अस्मभ्यं ददातु। तानि च वयं देवेषु देवनिमित्तमेव वनामहे संभजामहे स्वीकुर्मः। न
तु स्वदेहपोषणार्थमित्यर्थः॥ यद्वा तानि देवेषु देवेभ्यः वनामहे। वनतिश्च दानार्थः। दद्मः॥२॥ ॥

॥आत्वावहंत्वितिनवर्चमिंद्रंस्तुतं॥ तत्राद्या॥हेइंद्र वृषणं वृषितारं त्वा त्वातारं सोमपीतये सोमपानाय सूरचक्षसः सुष्ठु उरणि सम्यग्वि
षयवखाणि चक्षांसि चक्षूंषियेषां ते सूरचक्षसः। उरी शब्द पर्याय उरशब्दः। सुष्ठु उरी कुर्वंति विषयानिति सूरा प्रीति व्युत्पत्त्या सम्यग्विस्तु
विषयकं तस्सूरशब्दस्यज्ञेयं। त्वा त बहनयः अश्वाः आवहंतु॥१॥ ॥द्वितीया॥ हे हरी इंद्र संबंध्यश्वौ युवयोरर्थे इमा धानाः घृतस्नुवः
घृतार्द्राः संति। ष्णु प्रस्रवण इति धातोः विच्। तस्मादिंद्रं सुखतमेन रथेस्थितमिति शेषः। सुखतमेन रथेनेतिवा। इह यज्ञे उपवक्षतः
उपवहतं। अध्याहंतु। हे हरी मनो बुद्धी इंद्रार्थं इमाः धानाः घृतस्नुवः स्नेह साम्यात घृतं भक्षिः तयास्नुवः स्नुताः आर्द्राः भक्तियुक्ता इ

आत्वावहंतुहरयो वृषणंसोमपीतये। इंद्रत्वासूरचक्षसः॥ इमाधानाघृतस्नुवोहरीइहोपवक्षतः। इंद्रंसुखतमेरथे॥
इंद्रंप्रातर्हवामहइंद्रंप्रयत्यध्वरे। इंद्रंसोमस्यपीतये॥ उपनःसुतमागहिहरीभिरिंद्रकेशिभिः। सुतेहित्वाहवामहे॥
॥आ। त्वा। वहंतु। हरयः। वृषणं। सोमऽपीतये। इंद्र। त्वा। सूरऽचक्षसः॥ इमाः। धानाः। घृतऽस्नुवः। हरीइति। इह। उ
प। वक्षतः। इंद्रं। सुखऽतमे। रथे॥ इंद्रं। प्रातः। हवामहे। इंद्रं। प्रऽयति। अध्वरे। इंद्रं। सोमस्य। पीतये॥ उप।
नः। सुतं। आ। गहि। हरिऽभिः। इंद्र। केशिऽभिः। सुते। हि। त्वा। हवामहे॥

तियावत्। धानाः भृष्टि यवत्ति विशेषाः संति। तस्मादिह सुखतमे रथे शरीरे इंद्रमुपवक्षतः। वहते र्लेटि अडागमे शिपि उतक
तं षत्वे पुरूपं। उपवहतमित्यर्थः॥२॥ ॥तृतीया॥ वयमिंद्रं प्रातः प्रातः सवने हवामहे। अध्वरे यज्ञे प्रयति प्रवर्त्तमाने। माध्यंदि
ने सवन इतियावत्। इंद्रं हवामहे। सोमस्य पीतये तृतीयसवने सोमपानस्य पर्यवसानादसाधारण्येन व्यपदेश इति सोमपीति
शब्देन तृतीय सवनग्रहः। सोमपानार्थं इंद्रं हवामहे आह्वयामः॥३॥ ॥चतुर्थी॥ हे इंद्र केशिभिः प्रलंबकेशयुक्तैः हरिभिः
अश्वैः नः सुतं सोमं उपागहि उपागच्छहि। हियस्मात् त्वां सोमेषु सुतेषु सति हवामहे तस्मात्॥४॥ ॥

श्रीराम
२१

पंचमी॥ हे इंद्र स त्वं नः इमं स्तोमं स्तुतिं इदं सवनं च सुतं सोमं च उपागहि। आगत्य च तृषितो गौरो न मृगविशेष इव सोमं पिब॥५॥ षोडशे
सूक्ते प्रथमो वर्गः॥ ॥द्वितीय वर्गे आद्या॥ हे इंद्र इमे इंदवः इष्टदाः सुतासः अभिषुताः सोमासः सोमाः अधि बर्हिषि तदुपरिसं
ति। तान् सोमान् सहसे बलार्थं पिब॥ हरिपक्षे यजमानस्य बलार्थमितिवा तदीय बलाभिव्यक्त्यर्थं वेति। बलाभिव्यक्तिर्भक्षाभिष्ट
दानं ज्ञेयं॥१॥ ॥द्वितीया॥ हे इंद्र अग्रियः अग्र्यः शंतमः श्रोतॄणामति शयेन सुखप्रदः अयं स्तोमः स्तुतिः ते हृदिस्पृक् हृदयंगमो
स्तु। अतः स्तुत्या प्रीतस्त्वं सुतं अभिषुतं सोमं पिब॥२॥ ॥तृतीया॥ वृत्रहा इंद्रः मदाय यजमानस्य हर्षाय स्वगुणव्यक्त्यैवा सोमपी

समंनःस्तोममागह्युपेदंसवनंसुतं। गौरोनतृषितःपिब॥ ३०॥ इमेसोमासइंदवःसुतासोअधिबर्हिषि। ताँइंद्रसहसे
पिब॥ अयंतेस्तोमोअग्रियोहृदिस्पृगस्तुशंतमः। अथसोमंसुतंपिब॥ विश्वमित्सवनंसुतमिंद्रोमदायगच्छति। वृत्रहा
सोमपीतये॥ सइमंनःकाममापृणगोभिरश्वैःशतक्रतो। स्तवामत्वास्वाध्यः॥ सू०१६॥ वर्ग ३१॥ ॥सः। इमं। नः। स्तोमं।
आ। गहि। उप। इदं। सवनं। सुतं। गौरः। न। तृषितः। पिब॥ ३०॥ इमे। सोमासः। इंदवः। सुतासः। अधि। बर्हिषि। ता
न्। इंद्र। सहसे। पिब॥ अयं। ते। स्तोमः। अग्रियः। हृदिऽस्पृक्। अस्तु। शंतमः। अथ। सोमं। सुतं। पिब॥ विश्वं।
इत्। सवनं। सुतं। इंद्रः। मदाय। गच्छति। वृत्रऽहा। सोमऽपीतये॥ सः। इमं। नः। कामं। आ। पृण। गोभिः। अश्वैः। शतक्रतोइ
इतिशतऽक्रतो। स्तवाम। त्वा। सुऽआध्यः॥ ३१॥ ०

तये विश्वं सर्वं सवनं सर्वेष्वपि सवनेषु सुतं सोमं प्रतिगच्छति॥३॥ चतुर्थी॥ हे शतक्रतो स त्वं नः अस्माकं इमं गवादिविषयं कामं अ
भिलाषं गोभिरश्वैः गवाश्वं दत्वा आपृण संपूरय। पृण प्रीणन इत्येतस्य पूर्त्यर्थत्वं। धातूनामनेकार्थत्वात्। वयं स्वाध्यः स्व
ध्यः। सु आङ् इत्युपसर्गद्वय पूर्वकस्य धी शब्दस्य बहुवचनं। यणादेशश्छांदसः। नञ् [illegible] भिर्दृष्टमनित्यमिति तन्निषेधः सुधियोभि
तियणिनिषेधस्यानित्यत्वात्। सूत्रे सुधियोरिति रूपग्रहणात् इह यण्निषेधस्याप्राप्तेर्वा॥ सुधियोध्यायंतस्त्वां स्तवाम। ष्टुञ्स्तुतौ
लोट्॥ ॥४॥ ॥षोडशसूक्ते द्वितीयोवर्गः॥ ॥सूक्तानि १६॥ ॥वर्गाः॥ ३१॥ ॥छ॥ ॥

॥इंद्रावरुणयोरित्येतदपि नवर्चमैंद्रावरुणं। तत्राद्या॥ अहंसम्राजोः सम्यग्दीप्यमानयोः। राजृदीप्ताविति धातोः क्विप्। इंद्रावरुणयोः अवः अ
वनं। इंद्रावरुणकर्तृकरक्षणं आवृणे प्रार्थये। तौ चेंद्रावरुणौ नोस्माकं ईदृशे भावप्रधानं ईदृशाय अविकारेणावस्थानायेति यावत्
मृळातः नक्षितां॥१॥ ॥द्वितीया॥ हे इंद्रावरुणौ चर्षणीनां प्रजानां धर्त्तारा धर्त्तारौ धारकौ युवां मावतो ज्ञानयुक्तस्य विप्रस्य हवं आ
ह्वानं प्रति अवसे तस्य रक्षायै गंतारौ स्थः। हि तस्मादागच्छतमिति॥२॥ ॥तृतीया॥ हे इंद्रावरुणौ अस्मान्रायो वित्तस्य विषये अनुका
मं यथेष्टं आतर्पयेथां तर्पयतं। वयं च तौ वां युवां नेदिष्ठं क्षिप्रं ईमहे। रायो धनमिति शेषः। रायो धनं प्राप्नुम इत्यर्थः॥३॥ ॥चतुर्थी॥ हे इं

इंद्रावरुणयोरहं संम्राजोरव आवृणे। ता नो मृळात ईदृशे॥ गंतारा हि स्थोवसे हवं विप्रस्य मावतः। धर्त्तारा चर्षणीनां॥
अनुकामं तर्पयेथामिंद्रावरुणा राय आ। ता वां नेदिष्ठमीमहे॥ युवाकु हि शचीनां युवाकु सुमतीनां। भूयाम वाजदाव्नां॥
इंद्रः सहस्रदाव्नां वरुणः शंस्यानां। क्रतुर्भवत्युक्थ्यः॥३२॥ ॥इंद्रावरुणयोः। अहं। संऽराजोः। अवः। आ। वृ
णे। ता। नः। मृळातः। ईदृशे॥ गंतारा। हि। स्थः। अवसे। हवं। विप्रस्य। माऽवतः। धर्त्तारा। चर्षणीनां॥ अनुऽकामं। त
र्पयेथां। इंद्रावरुणा। रायः। आ। ता। वां। नेदिष्ठं। ईमहे॥ युवाकु। हि। शचीनां। युवाकु। सुऽमतीनां। भूयाम। वाजऽ
दाव्नां॥ इंद्रः। सहस्रऽदाव्नां। वरुणः। शंस्यानां। क्रतुः। भवति। उक्थ्यः॥३२॥ ॥

द्रावरुणौ वयं युवाकु। लुप्तषष्ठीकं बहुवचनांतं। युष्मदस्त्र्यकुः। युवयोः संबंधिनीनां शचीनां वाक्यानां साधवो यूयमित्येवं
रूपाणां तथा युवाकु सुमतीनां युष्मत्संबंधि बुद्धीनां सर्वदा विषयाः भूयाम भवेम। विकरणस्य लुक्। किं च वाजदाव्नां अन्न
प्रदातॄणां सर्वदा विषयाः भूयाम सर्वपूज्याः भवेमेति। आतो मनिन्॥४॥ ॥पंचमी॥ इंद्रः सहस्रदाव्नां भूरिदातॄणां शंस्यानां स्तु
त्यानां च क्रतुर्भवति। क्रतुरिव। क्रतुर्यथा कर्ममध्ये प्रधानस्तथा प्रधान इत्यर्थः। उक्थ्यः उक्थैः शस्त्रैः स्तुत्यः। एवं वरुणो
पीति योज्यं॥ ॥५॥ ॥सप्तदशो सूक्ते प्रथमो वर्गः॥ ॥३३॥ ॥

तृतीया॥ सः द्रविणोदाः अग्निः पिपीषति पी अपाने। सोमं पातुमिच्छति। सोमाश्च तस्मै प्रतिष्ठत प्रतिष्ठंत। तद्देशे नैव प्रतिष्ठिताः संति।
अतस्तांस्तस्मै जुहोत जुहुत। किं च नेष्ट्रात् नेष्टुः पत्नीनेतृत्वतो नेष्टृ नामकऋत्विजः। लक्षणयात्तत्संबंधि पात्रात्। पंचमी तृतीयार्थे।
नेष्टृपात्रेण ऋतुभिः ऋतुपात्रैः ऋतुदेवताभिः सहेति वा एनं अग्निं इष्यत अभीप्सत। प्रजयते नेति शेषः॥३॥ ॥चतुर्थी॥ हे द्रविणो
दाः अग्ने ऋतुभिः ऋतुपात्रैः तद्देवताभिः सह त्वां तुरीयं चतुर्थं वानमपि यद्यस्मात् त्वां यजामहे अध अथ तस्मात् नः अस्मभ्यं ददि
र्भव। ददद्दाने कि प्रत्ययः। दाता भव स्म॥४॥ ॥पंचमी॥ अश्विना। निरुक्तमेतद् अश्विनाय ज्वरीरित्यत्र। हे अश्विनौ दीद्यग्नी दीप्ता
ग्नी। अतिशयेन दीप्ताग्निसदृशावितियावत्। दीप्यो दीप्तावित्यतो यङ्लुगंतात् उ प्रत्यये टिलोपे दीद्यदिति सिद्धेः शुचिव्रता शुचि

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत॥ यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे। अध स्मा नो
ददिर्भव॥ अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता। ऋतुना यज्ञवाहसा॥ गार्हपत्येन संत्य ऋतुना यज्ञनीरसि। देवान्देवयते
यज॥ ब०२१॥ सू०१५॥ ॥द्रविणःऽदाः। पिपीषति। जुहोत। प्र। च। तिष्ठत। नेष्ट्रात्। ऋतुऽभिः। इष्यत॥ यत्। त्वा। तुरीयं।
ऋतुऽभिः। द्रविणःऽदः। यजामहे। अध। स्म। नः। ददिः। भव॥ अश्विना। पिबतं। मधु। दीद्यग्नी इति दीदिऽअग्नी। शुचिऽ
व्रता। ऋतुना। यज्ञऽवाहसा॥ गार्हऽपत्येन। संत्य। ऋतुना। यज्ञऽनीः। असि। देवान्। देवऽयते। यज॥ ॥वर्गः२१॥ ॥

पवित्रं कर्म ययोस्तौ शुचिव्रतौ। यज्ञवाहसौ यज्ञानां प्रवर्तकौ युवां ऋतुना पूर्ववत्। मधु सोमं पिबतं॥५॥ ॥षष्ठी॥ हे संत्य अज
स्रतनूपव्याहृतनूपर्संतत वहे हे तुना संत्येत्युक्तः। हे अग्ने हे विष्णो। संपूर्वात्तनु विस्तारे इत्यतो ऽ प्रत्ययः। त्वं गार्हपत्येन पात्रेण ऋतुना ऋ
तुपात्रेण ऋतुदेवतया सहेति वा। सोमं पीत्वेति शेषः। यज्ञनीः यज्ञानां प्रवर्तकोसि। स च त्वं देवयते देवान् एनीतिव्युत्पत्त्या देवयन्य
जमानः ऋणः शत्रु प्रत्ययः। तस्मै तत्प्रयोजनाय देवान् यज। अत्र सूक्ते सर्वत्र ऋतुदेवतया सहेत्युक्तं। ऋतुदेवताः द्वादश मासाधिपपुरु
षा वाहिपुदादरासुयथा कर्मं केशवादिद्वयं द्वयं षड्ऋतुषुक्तेयं। मासाधिपत्वं च विष्णोः सुपर्णो विप्रा इति श्रुतिसिद्धं। श्रुत्यर्थोक्ताया वाक्यः॥ ॥
पंचदशसूक्ते द्वितीयो वर्गः॥ ॥सू०१५॥ ॥वर्ग२२॥ ॥

द्वितीयवर्गे आद्या ॥ वयं इंद्रावरुणयोः इत् इंद्रावरुणयोरेव अवसा रक्षणेन सनेम भिन्नं ज्ञानं वा सदा आप्नुमः । नि धीमहि च नि य
च्छापयाम च । सदाता विंद्रावरुणौ चिंतयामेति वा । किंच अस्माकं प्ररेचनं विसर्जनं अर्थिने दानमुत स्यादेव ॥१॥ ॥द्वितीया॥ हे इंद्रा
वरुणौ अहं चित्राय भद्राय राधसे संसिद्ध्यर्थं वां युवां हुवे आह्वयामि । युवां अस्मान् सुजिग्युषः जितवतः कृतं कुरुतं । अत्रेंद्रावरुणे
त्यत्र संहितापदयोर्वैरूप्यतात्पर्यं युवं दक्षं धृतव्रतेत्यत्रोक्तं ॥२॥ ॥तृतीया॥ हे इंद्रावरुणौ नु अद्य वां नु नुमः । नु स्तुतौ । कर्त्रर्थे कल्लकारादेवास्य
कसीति प्रत्ययस्य लोपेन धातुमात्रनिर्देशोऽस्माकं स्तुतौ न कर्तृत्वं तवेव स्वातंत्र्यमिति ज्ञापनाय ॥ कर्त्रर्थक प्रत्ययाभावे कर्तृत्वाभावस्यतु
ज्ञानवात् । लोपः स्वातंत्र्यार्थ इति चिरंतनव्याकरणोक्तेरिति ज्ञेयं ॥ धीषु अस्मद् बुद्धिषु वां सिषासंतीषु साधयंतीषु सम्यक् प्रकारायै

तयोरिदवसा वयं सनेम नि च धीमहि । स्यादुत प्ररेचनं ॥ इंद्रावरुणा वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युष
स्कृतं ॥ इंद्रावरुणा नु नु वां सिषासंतीषु धीष्वा । अस्मभ्यं शर्म यच्छतं ॥ प्र वामश्नोतु सुष्टुतिरिंद्रावरुणा यां हुवे । या
मृधाथे सधस्तुतिं ॥ सू०१७ ॥ व०३३ ॥ ॥ तयोः । इत् । अवसा । वयं । सनेम । नि । च । धीमहि । स्यात् । उत । प्रऽरेचनं ॥
इंद्रावरुणा । वां । अहं । हुवे । चित्राय । राधसे । अस्मान् । सु । जिग्युषः । कृतं ॥ इंद्रावरुणा । नु । नु । वां । सिसासंती
षु । धीषु । आ । अस्मभ्यं । शर्म । यच्छतं ॥ प्र । वां । अश्नोतु । सुऽस्तुतिः । इंद्रावरुणा । यां । हुवे । यां । ऋधाथे इति । सधऽस्तुतिं ॥
॥३३॥

तीषु सतीष्विति यावत् । साध्यतेः स्वार्थे सन् । धातुलोप इडभावौ छांदसौ नुङीपौ । अस्मभ्यं शर्म सुखं यच्छतं । यतः वां अस्म
द्बुद्धयः प्रकारायंति तस्मात्सुखं गृहं अस्मभ्यं दत्तमिति भावः ॥३॥ ॥+श्च+ चतुर्थी ॥ हे इंद्रावरुणौ । वैरूप्यतात्पर्यं प्राग्वत् । अहं यां
सुष्टुतिं हुवे आह्वयामि । संपादयामीति यावत् । तृतीयार्थे वा द्वितीया । यया स्तुत्या वां हुवे इत्यर्थः । सा सुष्टुतिः शोभना स्तुतिः वां प्राश्नोतु प्रा
प्नोतु सम्यगाप्नोतु । अश्नोतु व्याप्तौ लोट् । तस्यां च न मे स्वातंत्र्यं । किंतु यां सधस्तुतिं । सधेति सहशब्दपर्यायः । अर्थसहितां स्तुतिं मे सदैव ऋधा
थे वर्धयेथे । प्रवर्तयथ इति यावत् । ऋधु वृद्धौ । व्यत्ययेन शाब्दिकनणं । अंतर्णीतणिजर्थश्चैव । सा वां प्राश्नोत्वित्यन्वयः ॥४॥ ॥ ससद्ग्रास्ते
द्वितीयो वर्गः ॥ ॥ सूक्तानि १७ ॥ ॥ वर्गाः ३३ ॥ ॥ ॥

सोमानमिति नवर्चस्य सूक्तं॥ अत्रर्षयश्च ब्राह्मणस्पत्यः। चतुर्थ्यामिंद्रश्च सोमश्च। पंचम्यां दक्षिणा च। शिष्टाश्च तस्त्रः सादसस्पत्यः। अंत्या नाराशं-
सी च॥ तत्राद्या। हे ब्रह्मणस्पते ब्रह्मणो वेदस्य पते। पारस्करादित्वात्सुट्। विश्वेगावाद्योवा स्वं नोऽस्मान्प्रति कातुण्यात् सोमानं स्वरणं सो-
मयं शब्दं कृणुहि कुरु। यः शब्दः प्राक्कक्षीवंतं ऋषिं मामिति यावत्। प्रतिदत्तः तादृशोंकः कक्षीवान्। यः औसिजः उसिकः सुतः॥१॥ ॥
द्वितीया॥ यः रेवान् वित्तवान्। रयेर्मतौ बहुलमिति रयिशब्दे यकारस्य मतुपि परतः संप्रसारणपूर्वरूपे आद्गुणः। यश्च अमीवहा रोगहा।
वसुवित् ज्ञानाख्य वसुनो वेत्ता। ज्ञानवंतं सर्वं जानातीति यावत्। यश्च पुष्टिवर्धनः भक्तानामेवंभूतो यः तुरः वेगित हेतुना विष्णु वीयु

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवंतं य औसिजः॥ यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः।
स नः सिषक्तु यस्तुरः॥ मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य। रक्षा णो ब्रह्मणस्पते॥ ॥सोमा
नं। स्वरणं। कृणुहि। ब्रह्मणः। पते। कक्षीवंतं। यः। औशिजः॥ यः। रेवान्। यः। अमीवऽहा। वसुऽवि
त्। पुष्टिऽवर्धनः। सः। नः। सिसक्तु। यः। तुरः॥ मा। नः। शंसः। अररुषः। धूर्तिः। प्रणक्। मर्त्यस्य।
रक्ष। न॥ ब्रह्मणः। पते॥

र्वा। तुर त्वरण इत्यतः कप्रत्ययः। सः नः अस्मान् सिषक्तु समवेतु। षच समवाये श्नुविकरणं। अस्माभिः संयुक्तो भवेदितिया
वत्॥२॥ ॥तृतीया॥ अररशब्दो अलंशब्दपर्यायः। उष हिंसायां क्विप्। अतिहिंसकस्य मर्त्यस्य धूर्तिः। धूर्हिंसायां क्तिन्।
हिंसकः शंसः वचनं उपद्रवकारि वचनमिति यावत्। नः अस्मान्मा प्रणक्। पृची संपर्के। न प्रविशेत्। मा प्रापयेदित्यर्थः॥
हे ब्रह्मणस्पते हरे वायो नः अस्मान्रक्ष। यथा तद्वचो नोऽस्मान्न प्राप्नुयात्तथा रक्षेत्यर्थः॥३॥ ॥

तृतीया॥सदसस्पतिं विनायज्ञो न सिध्यतीत्येतदेवोपपाद्यते।यस्माद्विभुः सदसस्पतिः हविष्कृतिं यजमानं ऋध्नोति हविष्कृतोय जतस्त्वृद्धिं करोति।यस्माच्च अध्वरं यज्ञं प्रांचं उत्तमं प्रकृष्टतया अंचति प्रवर्तत इति वा सत्ते। कृणोति करोति।यस्माच्च देवेषु देवेष्वया णि होत्रा होत्राणि देवाह्वानानि 'ह्वयतेस्त्रन्' प्रत्यये यजादित्वात्संप्रसारणं।न आनर्दिष्टमनित्यमिति ङित्त्वेऽपि चेति निषेधाभावः॥ब हुलग्रहणाद्वा गुणः। गच्छति प्राप्नोति स्वीकरोतीति यावत्।तस्मात्तेन विनाय ज्ञो न सिध्यतीति।अत्रर्द्धिकरणं सफलीकरणं। उत्तमकरणं तु देवोपभोग्यतापादनं।त्रयाणां पूर्वं पूर्वं प्रति चोत्तरोत्तरो हेतुः॥३॥ ॥चतुर्थी॥अत्र यस्वेति तमिति च ग्राह्यं॥य

आदृध्नोति हविष्कृतिं प्रांचं कृणोत्यध्वरं।होत्रा देवेषु गच्छति॥नराशंसं सुधृष्टमपश्यं सप्रथस्तमं।दि
वो न सद्ममखसं॥वर्ग ३५॥ ॥सूक्त १८॥ ॥आत्।ऋध्नोति।हविःऽकृतिं।प्रांचं।कृणोति।अध्वरं।
होत्रा।देवेषु।गच्छति॥नराशंसं।सुऽधृष्टमं।अपश्यं।सप्रथःऽतमं।दिवः।न।सद्मऽमखसं॥ ॥३५॥

स्य नराशंसस्य सद्मय हद्रूपं मखसं मखशब्दः पर्यायो मखसुशब्दो नपुंसकलिंगः।यद्वा सद्म अग्निगृहं मखसं यज्ञस्य दिवः स्वर्गादप्यतिशयेन प्रियमिति शेषः।प्रियं न प्रियमेव प्रतीयते।तं सुधृष्टमं सुधृष्टतमं।समाने लोप इति सूत्रान्निष्टातका रलोपः।अतिशायार्थे मप्रत्ययो वा।प्रगल्भतमं।सप्रथस्तमं प्रथसा अतिशयितगुणविस्तारेण सहितं।प्रथस्वानेन ततोसुन्। अतिशायिने तमप्।नराशंसं नरैः ब्रह्मादिभिः पुरुषैः शंस्यते स्तूयत इति नराशंसं विष्णुं अहमपश्यमिति॥अष्टादशे सूक्ते द्वितीयो
वर्गः॥वर्गः ३५॥ ॥सूक्तानि १८॥ ॥श्रीरामचंद्रायनमः॥

श्रीराम
३४

प्रतित्यमित्यपि नवर्चमग्निमारुतं सूक्तं॥तत्राद्या॥हे अग्ने विष्णो प्रधानाग्ने च गोपीथाय रक्षणाय चारुं भद्रं सम्यक्त्वास्त्रिकलक्षणं सं ते प्रसिद्धं अध्वरं यज्ञं प्रति लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इति वीप्सायां कर्मप्रवचनीयः प्रतिशब्दः।सर्वान्यज्ञान्प्रतिप्रह यसे आह्वयसे यस्मात्तस्मान्मरुद्भिः सह आगहि आगच्छ॥१॥ ॥द्वितीया॥हे अग्ने क्रतुं प्रत्यागंतुमिति शेषः।तव सकाशात्परो अन्यः हद न्यो देवो महो महान्नहि नैवास्ति।मर्त्यस्तु नैवास्तीति किमुत।तस्मान्मरुद्भिरग्न आगहि।पूर्वत्र प्रतीतं सर्वोत्तमत्वं विष्णावग्नौ चय थायोगे ज्ञेयं॥२॥ ॥तृतीया॥यत्ते अद्रुहः नद्रुह्यंतीति सतां अद्रोग्धारः।विश्वे देवासः मरुतः आगहि महो महतः रजसः रंजकात् स्वर्गादिति यावत्।ल्यब्लोपनिमित्ता पंचमी।स्वर्गमधिष्ठायैव विदुः।अखिलमिति शेषः।तैः द्रुहदरनादिमद्भिः मरुद्भिरग्न आग

प्रतित्यं चारुमध्वरं गोपीथाय प्रहूयसे।मरुद्भिरग्न आगहि॥नहि देवो न मर्त्यो महस्तव क्रतुं परः।मरुद्भिरग्न आग
हि॥ये महो रजसो विदुर्विश्वे देवासो अद्रुहः।मरुद्भिरग्न आगहि॥य उग्रा अर्कमानृचुरनाधृष्टास ओजसा।म
रुद्भिरग्न आगहि॥ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः।मरुद्भिरग्न आगहि॥३६॥ ॥प्रति।त्यं।चारुं।
अध्वरं।गोऽपीथाय।प्र।हूयसे।मरुत्ऽभिः।अग्ने।आ।गहि॥न।हि।देवः।न।मर्त्यः।महः।तव।क्रतुं।परः।
मरु०॥ये।महः।रजसः।विदुः।विश्वे।देवासः।अद्रुहः।मरु०॥ये।उग्राः।अर्कं।आनृचुः।अनाधृष्टासः।ओ
जसा।मरु०॥ये।शुभ्राः।घोरऽवर्पसः।सुऽक्षत्रासः।रिशादसः।मरुत्ऽभिः।अग्ने।आ।गहि॥ ॥वर्ग ३६॥ ॥

हि॥३॥ ॥चतुर्थी॥ये उग्राः क्रूराः देवान्प्रति ओजसा सामर्थ्येन अनाधृष्टासः अनाधर्षिताः अनभिभूताः अर्कं आनृचुः प्राप्ताः अर्चगतिपूजनयोर्लिट्।अर्कः सूर्यविशेषेण संनिहितैर्मरुद्भिर्देवैः तु तत्सहेतुनाभगवद्रूपैः प्रसिद्धं मरुद्भिश्चाग्ने आगहि॥४॥ ॥पंचमी॥ ये शुभ्राः शुभ्राः घोरं देवान्प्रति क्रूरं वर्पो बलं येषां ते घोरवर्पसः।सुक्षत्रासः शोभनं क्षत्रं त्राता येषां सुष्ठु क्षपितः शातार इति वा।सुष्ठु वा क्षिणि बा रसत्त्वतो वा क्षिक्षयदसतौ वा उप्रत्ययः।क्षेऽपालन दस्यतो आतोनुपसर्गेकः।आज्जसेरसुक्।रिशादसः रम्यसुखपशोकानः।नमतेर्दिः रि नम्यसोसुरवे अदतीति वा सते।अत्र चाक्षुने।एवंभूताः ये मरुतः तैः मरुद्भिरग्न आगहि॥५॥ ॥अत्र सूक्ते प्रथमो वर्गः॥ ॥३६॥ ॥

द्वितीयआद्या॥ये देवासः सुराः मनुतः नाकस्य निर्दुःखस्य स्वर्गस्य अधि स्वर्गस्योपरि दिवि रोचने उच्चैर्दीप्त्युद्दसूर्यादिप्रकाशे
आसते। तेर्मनुद्भिरग्न आगहि॥१॥ ॥द्वितीया॥ये पर्वतान् गिरीन् ईंखयंति। ईंखगतौ। गमयंति। एतोलयंतीतियावत्॥ तथा अ
र्णवं उदकवंतं समुद्रं सागरं च तिरः तिरस्कृत्य वर्तंते॥ विष्णौ तु पर्वतान् जन्मलक्षणपर्वतान् पुरुषान् पुरुषपदान्मरुतत्वेन प्रत्य
यः। ईंखयंति प्रेरयंति। अर्णवं जलाधिष्ठितं धारत्वादुदन्वतीं समुद्रेक हेतुना समुद्रमित्युक्तां प्रकृतिं तिरः तिरस्कुर्वंतीति। नियमा
र्थेन समुद्रं तिरः तिरस्कुर्वंतीति नियमयंतीति व्याख्या। तेः मनुद्भिः मनुनामकैर्देवैः सह मनुदंतर्गतैः पृथक्स्थितैर्वा रूपविशेषैः सह

ये नाकस्याधि रोचने दिवि देवास आसते। मनुद्भिरग्न आगहि॥ य ईंखयंति पर्वतान्तिरः समुद्रमर्णवं। मनु०॥
आ ये तन्वंति रश्मिभिस्तिरः समुद्रमोजसा। मनुद्भि०॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु। मनुद्भिरग्न आग
हि॥ ॥वर्गः ३७॥ सूक्तानि १९॥ ॥इतिश्रीप्रथमाष्टके संहितायां प्रथमोऽध्यायः॥ ॥१॥ ॥ये। नाकस्य।
अधि। रोचने। दिवि। देवासः। आसते। मनु०॥ ये। ईंखयंति। पर्वतान्। तिरः। समुद्रं। अर्णवं। मनु०॥ आ। ये। तन्वं
ति। रश्मिऽभिः। तिरः। समुद्रं। ओजसा। मनु०॥ अभि। त्वा। पूर्वऽपीतये। सृजामि। सोम्यं। मधु। मनुद्भिः। अग्ने। आ।
गहि॥ ॥३७॥ ॥सूक्तानि १९॥ ॥इतिश्री प्रथमाष्टके प्रथमोऽध्यायः॥ ॥१॥ ॥श्रीलक्ष्मीनृसिंहाय नमः॥१॥

अग्ने विष्णो प्रसिद्धाग्ने त्वं आगहि॥२॥ ॥तृतीया॥ ये रश्मिभिः तेजोभिः सर्वं आतन्वंति व्याप्नुवंति। तथा ओजसा सामर्थ्ये
न समुद्रं तिरः तिरस्कुर्वंति। तेर्मनुद्भिरग्न आगहि॥३॥ ॥चतुर्थी॥ अहं त्वा अभि त्वां प्रति पूर्वपीतये प्रथमपानाय सोम्यं साम
रूपं मधु स्वादु द्रव्यं सृजामि निर्ममे। तस्मान्मनुद्भिरग्न आगहि॥४॥ ॥एकोनविंशे सूक्ते द्वितीयो वर्गः॥ ॥वर्गाः ३७॥ सूक्तानि
॥१९॥ ॥आद्याध्यायस्य मंत्रार्थान् स्पष्टटीकान् निरूपितान्। समग्रहीत् बालानां बोधाय प्रार्थितात्वयं॥१॥ ॥इतिश्रीम
न्मंत्रार्थमंजर्यां सुधींद्रगुरुपादशिष्यराघवेंद्रयतिकृतायां प्रथमाष्टके प्रथमोऽध्यायः॥ ॥१॥ ॥श्रीसीतारामार्पणमस्तु॥१॥

श्रीराम
३५

· End of Adhyaya I. Ashtaka 1. Mantrartha Manjari
by Raghavendra Yati disciple of Sudhindra Guru.

चतुर्थी॥ घ इति हेत्वर्थे प्रसिद्धौ द्योतकः। चार्थे च। यं मर्त्यं इंद्रो ब्रह्मणस्पतिः सोमश्च हिनोति। हिगतौ वृद्धौ च। गच्छति वर्धयति स ए
व मर्त्यः वीरो विक्रांतो न रिष्यति। रिष हिंसायां। न हिंस्यते। घं प्रसिद्धमेतत्। इंद्रब्रह्मणस्पति शब्दयोः पूर्वे त्रैव हरौ निरुक्तिरुक्ता।
सोमशब्दस्य तु उश्च माच उमे रुद्रलक्ष्म्यौ ताभ्यां सहित इति वा भूतानि वै विश्व उमानीति श्रुतेः उमेभ्यः तैः सह इति प्रेरक तया वर्त्त
त इति वा न विद्यते मा परिमितिर्यस्य सोऽमः स्वान् त्वात्मः स्वगतावित्यतोऽस्य। तस्य तुर्ते सश्चासावमश्चेति वा निरुक्तिर्ज्ञेया।
॥४॥ ॥हे ब्रह्मणस्पते यः त्वद्भक्तः तं मर्त्यं त्वं अंहसः पापात् पाहि। सोम इंद्रो दक्षिणा च पाहीति प्रत्येकमन्वयः। दक्षे दक्षिणसागरे

स घा वीरो न रिष्यति यमिंद्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यं॥ त्वं तं ब्रह्मणस्पते सोम इंद्रश्च मर्त्यं। दक्षिणा
पात्वंहसः॥३४॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं॥ यस्मादृते न सिध्यति यज्ञो वि
पश्चितश्चन। स धीनां योगमिन्वति॥ ॥सः। घ। वीरः। न। रिष्यति। यं। इंद्रः। ब्रह्मणः। पतिः। सोमः। हि
नोति। मर्त्यं॥ त्वं। तं। ब्रह्मणः। पते। सोमः। इंद्रः। च। मर्त्यं। दक्षिणा। पातु। अंहसः॥३४॥ सदसः। पतिं। अद्भु
तं। प्रियं। इंद्रस्य। काम्यं। सनिं। मेधां। अयासिषं॥ यस्मात्। ऋते। न। सिध्यति। यज्ञः। विपःऽचितः। च
न। सः। धीनां। योगं। इन्वति॥

नः स्वामी यस्याः सा इति शक्रं ध्वादित्यपररूपेण दक्षिणा अत्र श्रीर्ज्ञेया। दक्षिणे सरलो दारा वित्यभिधानाच्चतुरहहेतुनाश्री
वी रूपो हरिर्ज्ञेयः॥५॥ ॥अष्टादशेसूक्ते प्रथमो वर्गः॥ ॥द्वितीयवर्गे आद्या॥ अहमद्भुतं आश्चर्यं इंद्रस्य प्रियं सर्वजनानामपि काम्यं।
सनिं लाभस्वरूपं मेधां ज्ञानस्वरूपं सदसस्पतिं विष्णुं प्रधानवायुं प्रधानाग्निं वा अयासिषं। यप्राप्तणे। ज्ञानपंगतो स्मिं लुट्॥१॥
द्वितीया॥ यस्मात् सदसस्पतेः ऋते विपश्चितश्चन ज्ञानिनोपि यज्ञो न सिध्यति। सः धीनां बुद्धीनां योगं इन्वति प्राप्नोति। इन प्राप्तौ ल
ट्। अडागमः। बुद्धिप्रेनकत्वात् ध्येयत्वाच्चयो धीयोगमाप्नोतीत्युक्तः॥२॥ ॥ ॥ ॥ ॥ ॥ ॥

॥श्रीसीतारामायनमः॥ ॥अयंदेवायेत्येतदष्टर्चंमाष्टमंसूक्तं॥ ॥तत्राद्या॥ विप्रेभिः विप्रैःमेधातिथिप्रभृतिभिःअयंबुधिस्थः रत्नधा
तमः। रत्नंसुखं। रमेस्तप्रत्ययोऽनुनासिकलोपश्च। रत्नंधत्तेरत्नधाः। डुधाञ्धारणपोषणयोः। अतिशयेनसुखधाः रत्नधातमः।
हेतुगर्भं। इमंस्तोमंस्तुतिंजन्मनेसर्वजननकर्त्रे। जनेर्मनिन्। देवाय अग्निमीळइत्यत्रोक्तदिवाक्रीडादिगुणविशिष्टायविष्णवे आ
सया आस्येन। नकेवलं मनसावचसापीतिभावः। अकारि अकृत। डुकृञ्करणेलुङ्। अस्यंतेक्षिप्यंतेवर्णाअनयेतिआसामुखं।
असुक्षेपणइत्यतःकरणेघञंतः पुंसीतिपाणिनीयलिंगानुशासनसूत्रेणोवृधान्यइत्यत्रानित्यत्वोक्तेः। देवतांतरविषयेतुजन्मनेदेवा
यएकवचनंबहुवचनार्थे।+ ञ।घ+ जन्मानिजातेभ्यः मानुषाएवहितेजाताइतिनिगमात्। तदुपरीत्युक्तन्यायेनमनुष्यत्वेनसता
मेवदेवत्वेनजातेभ्यः। देवाय देवेभ्यः ऋभुभ्यइत्यर्थः॥ अन्यत्समानं। ऋभुनामकस्यैकत्वेपिविभ्वावाजइतिनाम्नोरन्ययोःसाहचर्याद्बहु

अयंदेवायजन्मनेस्तोमोविप्रेभिरासया। अकारिरत्नधातमः॥ यइंद्रायवचोयुजाततक्षुर्मनसाहरी। शमीभिर्यज्ञ
माशत॥ ॥ॐ॥ अयं। देवाय। जन्मने। स्तोमः। विप्रेभिः। आसया। अकारि। रत्नऽधातमः॥ ॥ये। इंद्रा
य। वचःऽयुजा। ततक्षुः। मनसा। हरीऽइति। शमीभिः। यज्ञं। आशत॥ ॥

नाम्नैवत्रयाणांग्रहणं॥१॥ ॥द्वितीया॥ येऋभवः इंद्राय इंद्रस्यार्थे वचोयुजा वचसायुज्येतेइतिवचोयुजा। शब्दमात्रेणरथेयोज्यौ
हरीवाजिनौ मनसासंकल्पमात्रेणततक्षुः चक्रुः। तक्षकरणइतिधातोः। येशमीभिर्विष्टगुनिष्ठाभिः। शमीमन्निष्वता बुधैरि
त्युक्तेः। स्त्रीलिंगङीप् इयंछांदसं। यज्ञंयज्ञभागंआशत अश्नुव्याप्तौ। अश्नुवतं लेभिरे। तेभ्यः स्तोमोकारीति पूर्वेणान्वयः॥
अत्रऋभ्वादिदेवतांतर्गतानिलिंगानितत्तद्देवतांतर्यामिभगवद्रूपेषुमुख्यानीतिशास्त्रदृष्ट्यात्पदेशोवामदेववत्जीवमुख्यप्राण
लिंगान्नेतिचेदित्यादेरोक्तत्वेव्यक्तानीतितत्तदंतर्गतरूपापेक्षयामंत्राणांयोजनासुशका। पृथक्किंचितभगवद्रूपपक्षेतु येभगव
द्रूपविशेषाः इंद्रानुष्ठिताभिःशमीभिःप्रसन्नास्तदीयंयज्ञमाशत। ऋभुभिःकरणैरिंद्रायहरीततक्षुरिति। तदेवमग्रेपिज्ञेयं। अध्या
त्मंतु येइंद्रायतंविषयीकर्तुंभक्तानांहरीमनोबुध्याख्यौवचोयुजावेदानुसारिणौततक्षुः। तदीयाभिःशमीभिस्तदीयंज्ञानंयज्ञंचाशतेति॥२॥

तृतीया॥ ऋभवः नासत्याभ्यां। अश्विनोरेकोनासत्यनामकः। तत्साहचर्याद् उभावपि नासत्यावुच्येते यथा दस्रावितीति। अतएव भारतता
स्येर्ये नासत्यदस्रावश्विसुतौ। अश्विनोरर्थे परिज्मानं 'ज्मां भूमिं परितः चरतीति परिज्मानं सकलपृथ्वीगामिनं 'अप्रतिहतगतिं सुखं सु-
खहेतुं रथं तक्षन् अतक्षन् अकुर्वन्। सबर्दुघां बकामन इति धातोः कर्मणि निन् प्रत्यये ससुडागमे च सबर् इति काम्यमुच्यते। सर्वकामदो-
घ्रीं धेनुं बृहस्पतेः कामधेनुं तक्षन् अतक्षन्निति॥३॥ ॥चतुर्थी॥ ऋभवः ऋतस्य ज्ञानस्य भवः आश्रया इति ऋभुशब्दवाच्याः विष्णु-
रूपविशेषाः। ऋतशब्दे निष्ठालोपः। ऋ इत्यस्य ह्रस्वता। ऋतं कर्मभूतं सत्यमेषामस्तीति वा ऋतं यज्ञभागं भूताः। 'ऋभवो' प्राह इति वा
ऋभवः प्रसिद्धदेवताश्च। ऋभुशब्दयोरूपेण तद्रूपावा। पृषोदरादित्वात्। ऋजुयवः। ऋजून् सरलतयोग्यान् आत्मनः स्वामित्वेन इच्छन्तीति ऋ-
जूयवः। सुप आत्मनः क्यच्। शीलार्थे कउ प्रत्ययः। अकृत्सार्वधातुकयोरिति दीर्घः। ऋजुभक्ता इति यावत्। अतएव सत्यमंत्राः अमोघमंत्राः

तक्षन्नासत्याभ्यां परिज्मानं सुखं रथं। तक्षन् धेनुं सबर्दुघां॥ युवाना पितरा पुनः सत्यमंत्रा ऋजूयवः। ऋभवो वि-
ष्ट्यक्रत॥ ॥तक्षन्। नासत्याभ्यां। परिऽज्मानं। सुऽखं। रथं। तक्षन्। धेनुं। सबःऽदुघां॥ ॥युवाना। पि-
तरा। पुनरिति। सत्यऽमंत्राः। ऋजुऽयवः। ऋभवः। विष्टी। अक्रत॥ ॥

संतः पितरा पितरौ सुधन्वाख्यं स्वपितरं स्वमातरं च। पितामात्रेत्येकशेषः। पुनः युवाना युवानौ अक्रत अकुर्वत। जीर्णौ मातापि-
तरौ पुनस्तरुणावकुर्वन्। किं च विष्टी विष्ट्या। द्वितीयायाः सुपां सुलुगित्यादिना पूर्वसवर्णः। वेतनेन विना बलात् क्रियमाणं कर्म। ए-
एकं चमसं चतुरः कृणोतनेत्यादिवक्ष्यमाणदिशा अक्रत देवानामर्थे अकुर्वन्। ढुकृञ् करणे लुङात्मनेपदे विकरणलोपः। अत्र ऋजु-
सत्यहाद्यन्यगतलिंगानि तद्दर्त्यान्यपेक्षयानेयानि। यानि त्रिष्वेकदेशे इति न्यायात्। तथापि कथं तौ चतापादकलिंगघटनेति चेन्न। सर्वशास्त्र-
वत्वरूपसर्वव्यापारकर्तृत्वरूपस्वातंत्र्यस्य चान्यशब्दलिंगनिमित्तत्वं च तदधीनत्वादर्थवदिति सर्वं असिद्धमिति श्रेयं॥ ॥४॥ ॥श्रीरामचंद्र॥

॥इहेंद्राग्नी इति षडृचमैंद्राग्नं सूक्तं॥ तत्राद्या॥ अहं इह यज्ञे इंद्राग्नी उपह्वये। यस्मात्तयोरिंद्राग्न्योरेव स्तोमं स्तुतिमुश्म
सि सर्वे वयं कामयामहे। वश कांतौ। ग्रहिज्यावयिव्यधिवष्टीत्यादिना संप्रसारणं। अनेन स्तुतिं प्रत्युपह्वयेरत्युक्तं भवति॥ तौ तौ सोम
पातमा सोमपातमौ अतिशयेन सोमानां पातारौ। अतः सोमं चोप प्रत्युपह्वय इति॥१॥ ॥द्वितीया॥ हे नरः ऋत्विजः तौ प्रकृतौ इंद्रा
ग्नी यज्ञेषु प्रशंसत। प्रकर्षेण स्तुतिं कुरुत। शुंभत भूषयत च। शुभ शुंभ शोभार्थे अंतर्णीतण्यर्थः। किंच ताविंद्राग्नी गायत्रेषु गा
यत। सामसु। तृतीयार्थे सप्तमी॥२॥ ॥तृतीया॥ यौ तौ प्रसिद्धौ। मित्रस्य मितुक्तमेतन्मित्रं सुवदत्र। हवेः प्रशस्तये प्रशस्तार्थं

इहेंद्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि। ता सोमं सोमपातमा॥ ता यज्ञेषु प्र शंसतेंद्राग्नी शुंभता नरः। ता गायत्रेषु
गायत॥ ता मित्रस्य प्रशस्तय इंद्राग्नी ता हवामहे। सोमपा सोमपीतये॥ उग्रा संता हवामह उपेदं सवनं सुतं। इंद्राग्नी
एह गच्छतां॥ ता महांता सदस्पती इंद्राग्नी रक्ष उब्जतं। अप्रजाः संत्वत्रिणः॥ ॥इह। इंद्राग्नी इति। उप। ह्वये। तयोः।
इत्। स्तोमं। उश्मसि। ता। सोमं। सोमऽपातमा॥ ता। यज्ञेषु। प्र। शंसत। इंद्राग्नी इति। शुंभत। नरः। ता। गायत्रेषु।
गायत॥ ता। मित्रस्य। प्रऽशस्तये। इंद्राग्नी इति। ता। हवामहे। सोमऽपा। सोमऽपीतये॥ उग्रा। संता। हवामहे। उ
प। इदं। सवनं। सुतं। इंद्राग्नी इति। आ। इह। गच्छतां॥ ता। महांता। सदस्पती इति। इंद्राग्नी इति। रक्षः। उ
ब्जतं। अप्रजाः। संतु। अत्रिणः॥ ॥

भवतः। देवेषु परमैश्वर्यस्य प्रशंसा लोके प्रख्याप्यते। तौ सोमपा इंद्राग्नी सोमपीतये हवामहे॥३॥ ॥चतुर्थी॥ उग्रा उग्रौ श
त्रूणां क्रूरौ संता संतौ शास्तौ इंद्राग्नी इदं सवनं इमं यज्ञं सुतं सोमं च प्रति हवामहे। तदवधार्य इंद्राग्नी इहागच्छतां। गमेर्लोट्॥४॥
पंचमी॥ इंद्राग्नी यौ युवां महांतौ पूज्यौ सदसस्पती सदसः यज्ञगृहविशेषस्य स्वामिनौ। तौ रक्षः रक्षांसि। एकवचनं बहुवच
नार्थे। उब्जतं। उब्ज आर्जवे इति धातुपाठेपि इह सामर्थ्याद्वधार्थः। हतमित्यर्थः। किंच अत्रिणः व्रीह्यादिवादिनिः। नत्रिणः अत्रि
णः स्वर्गमोक्षपृथिवीरूप पितृमार्ग देवमार्ग मनुष्यमार्ग रूपमार्गत्रयहीनाः। तमोगतेरिति भावः। रक्षःसंबंधिजनाः अप्रजाः संत्विति॥५॥

षष्ठी॥ हे इंद्राग्नी युवां तेन प्रसिद्धेन सत्येन गुणपूर्णेन विष्णुना। तत्प्रसादेनेति यावत्। प्रचेतुने प्रकृष्टचेतने। अधि आधिक्यार्थे उकारः।
पदे गम्ये पदगतौ कर्मणि घञ्कारप्रत्ययः। हस्ते। अधि सम्यक् अनन्ययोगेन स्वभावतो जाग्रतं तद्विषयजागरणवंतौ स्थः। एवंभू
तावस्मभ्यं शर्म सुखमेव यच्छतं॥ विष्णुपक्षे तु। हे इंद्राग्नी विष्णुरूपे युवां तेन सत्येन प्रसिद्धेनेत्यादिना गुणेन स्वविषये जाग्रतं स्वसा
मर्थ्येनैव स्वप्रकाशोऽस्थ इति॥ अत्र शब्दस्य गुणपूर्ति वाचिता सद्भावे साधुभावे चेत्यादि गुणवाचित्वात् सद्भिर्गुणैस्सः व्याप्त इति सत्यशब्दो
पपदात्तनोतेर्डप्रत्यय इत्येवं रूपेण + सत्य + ज्ञेया॥ ज्ञानेच्छादिगुणवाचित्वं तु सत्यशब्दपर्याय हासत्यशब्दस्येति ज्ञेयं॥ अस्मभ्यमित्यादि पूर्व
वत्॥६॥ ॥द्वितीयं सूक्तं॥२॥ ॥प्रातर्युजेत्येकविंशत्यृचं सूक्तं नानादेवत्यं॥ तत्राद्याश्चतस्र आश्विनः। तत्राद्या॥ हे होतः प्रात

तेन सत्येन जागृतमधि प्रचेतुने पदे। इंद्राग्नी शर्म यच्छतं॥३॥ सू०२॥ ॥प्रातर्युजा वि बोधयाश्विनावेह
गच्छतां। अस्य सोमस्य पीतये॥ या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना ता हवामहे॥ ॥तेन। सत्ये
न। जागृतं। अधि। प्रऽचेतुने। पदे। इंद्राग्नी इति। शर्म। यच्छतं॥ ॥३॥ ॥प्रातःऽयुजा। वि। बोधय। अ
श्विनौ। आ। इह। गच्छतां। अस्य। सोमस्य। पीतये॥ या। सुऽरथा। रथिऽतमा। उभा। देवा। दिविऽस्पृ
शा। अश्विना। ता। हवामहे॥ ॥

युजा प्रातःसवने स्तुतिविषयत्वेन युज्येते इति प्रातर्युजौ अश्विनौ प्रसिद्धाश्विनौ। तथा प्रातर्युजौ हंसोपासनारूपसमाधेः उ
क्तं च तंत्रसारे चतुर्थे प्रातर्योगो महानयमिति। तद्विषयत्वाद्विष्णुरूपे अप्युपेयोपाययो रभेदोपचारात्प्रातर्युजा इत्युच्येते। अश्विनौ अ
श्विनाय ज्वरीश्वर इत्यत्रोक्तं मितुक्त्वा विष्णुरूपविशेषौ विबोधय। सर्वदा विबुधौ एवेव वर्तमानौ प्रार्थयस्वेति यावत्। ताविह अस्य सो
मस्य पीतये आगच्छतां॥१॥ ॥द्वितीया॥ यौ अश्विनौ उभौ देवौ सुरथा शोभनरथौ। रथितमा अतिशयेन रथिनौ। दिविस्पृशा दि
वि स्वर्गे वर्तमानौ। तौ तौ हवामहे आह्वयामः॥ ॥२॥ ॥तृतीये सूक्ते प्रथमे वर्गे द्वितीयाष्टक॥ ॥

तृतीया॥ हे अश्विनौ या वां युवयोः संबंधिनी मधुमती स्वादुत्वकारिणी सूनृतावती सूनृतावेदवाणीति इतीतत्स्तुता कशा अश्वनोदिनी तया अस्मदीयं यज्ञं यत्तत्संबंधिघृतसोमादिवस्तु मिमिक्षतं स्नातं। मिक्षस्पर्शने श्लुविकरणं लोट्॥ यद्वा मिहस्य रीनद्र्सतः स्वार्थिकस नंतस्य रूपं॥३॥ ॥चतुर्थी॥ अश्विनौ सोमिनो यजमानस्य गृहे द्वितीयार्थे सप्तमी। गृहं रथेन गच्छथः आगच्छथः। तत वां युवयोः दूरके नास्ति दूरं नहि तस्मादागच्छतं॥४॥ ॥पंचमी॥ हिरण्येत्यादि चतस्रः आदित्याः। अहं हिरण्यपाणिं। हितं च रमणीयं च हितरमणी यं च हिरण्यवर्णं वा हाहिरण्यं लक्षणया पाणिशब्दोक्त सर्वावयवोपेतं रूपं यस्य तं। हितशब्दस्य हिरादेशः रमेण्यंक। अनुनासिक लोपः निउक्तत्वात्। सवितारं जगत्प्रसवितृत्वहेतुना सवितृशब्दोक्तं। षू प्राणिप्रसव इत्यतः तृन्तृचौ वा। ऊतये रक्षार्थं उपह्वये

याँवांकशामधुमत्यश्विनासूनृतावती। तयायज्ञंमिमिक्षतं॥ नहिवामस्तिदूरकेयत्रारथेनगच्छथः। अश्विनासोमिनोगृहे॥
हिरण्यपाणिमूतयेसवितारमुपह्वये। सचेत्तादेवतापदं॥४॥ अपांनपातमवसेसवितारमुपस्तुहि। तस्यव्रतान्युश्मसि॥
॥या। वां। कशा। मधुऽमती। अश्विना। सूनृताऽवती। तया। यज्ञं। मिमिक्षतं॥ नहि। वां। अस्ति। दूरके। यत्र। रथेन।
गच्छथः। अश्विना। सोमिनः। गृहे॥ हिरण्यऽपाणिं। ऊतये। सवितारं। उप। ह्वये। सः। चेत्ता। देवता। पदं॥४॥ ॥
अपां। नपातं। अवसे। सवितारं। उप। स्तुहि। तस्य। व्रतानि। उश्मसि॥ ॥

आह्वयामि। कुतः। सः सविता पदं स्वरूपं स्वस्यान्यस्य च चेत्ता। चिती संज्ञाने तृन्। एवं देवताद्देवः। अन्ये तु देवताभासाः। यद्वा भावे तल्प्रत्ययः। देवस्य भावो देवता। देवशब्दस्य प्रवृत्तिनिमित्तं क्रीडादिगुणजातं। स एव तद्भिन्नमेकगुणगुण्यभेदस्य उभ यव्यपदेशादिति भक्तिपादीयाधिकरणे सिद्धत्वात्सिद्धं सवितरि यथायोगं शब्दार्थो ज्ञेयः॥५॥ ॥तृतीये सूक्ते प्रथमो वर्गः॥
॥द्वितीयवर्गे आद्या॥ हे होतः अपां नपातं अद्भ्यो जातपृथ्व्यात्मकदेहहेतुत्वेन कृतया अपांपौत्रत्वेन अपांनपातं सवितारं अपां कार्येब्रह्मांडे वने जातत्वया अपांपौत्रत्वेन अपांनपातं सूर्यं च अवसे रक्षार्थं उपस्तुहि। कुतः। तस्य सवितुः हेतोः नवेत्य व्रतानि क र्माणि उश्मसि सर्वे वयं कामयामहे। वश कांतौ। ग्रहिज्येति संप्रसारणं॥ ॥१॥ ॥

३८

पंचमी॥ हे ऋभवः मदासः मदहेतवः इंद्रवः सोमाः मरुत्वता इंद्रेण सह राजभिः दीप्यमानेभ्यः आदित्येभ्यः वः युष्माकं। द्वितीयार्थे षष्ठी। युष्मान् समग्मत संप्राप्ताः। गम्लृ गतौ। लुङ् आत्मनेपदि। उपधालोपः सादेशो छांदसो॥५॥ ॥आद्ये सूक्ते प्रथमो वर्गः॥१॥ ॥
द्वितीयवर्गे आद्या॥ उत अन्यच्च हे ऋभवः त्यं तं पूर्वकृतं जीर्णमेकमेव चमसं पुनः नवान् नूतनान् चतुरश्चमसान् अकर्त अकुर्वन्। एवं त्वष्टु र्देवस्य निष्कृतं निरुपणमकृत। अयं भावः देवैः प्रेषितोऽग्निः त्वष्टा वच्छ्रमना हत्। इममेकं जीर्णमेकं चमसं नवानेत्तमाणां श्चतुरश्चम सान्कुरुतेति। तेऽब्रुवन्। द्यौवाची शिवाक रिष्यामश्चतुरो दुष्करा इति। पुनश्चाग्निना तथैवाचरितं ऋभिकृतं दृष्ट्वा द्विकरणं परिसज्य

संवोमदासोअग्मतेंद्रेणचमरुत्वता। आदित्येभिश्चराजभिः॥१॥ उतत्यंचमसंनवंत्वष्टुर्देवस्यनिष्कृतं। अकर्त्त
चतुरःपुनः॥ तेनोरत्नानिधत्तनत्रिरासाप्तानिसुन्वते। एकमेकंसुशस्तिभिः॥ अधारयंतवह्नयोभजंतसुकृत्य
या। भागंदेवेषुयज्ञियं॥२॥ सू०१॥ ॥सं। वः। मदासः। अग्मत। इंद्रेण। च। मरुत्वता। आदित्येभिः। च। राजऽभिः॥१॥
उत। त्यं। चमसं। नवं। त्वष्टुः। देवस्य। निःऽकृतं। अकर्त्त। चतुरः। पुनरिति॥ ते। नः। रत्नानि। धत्तन। त्रिः। आ। साप्तानि। सुन्वते।
एकंऽएकं। सुशस्तिऽभिः॥ अधारयंत। वह्नयः। अभजंत। सुऽकृत्यया। भागं। देवेषु। यज्ञियं॥२॥ ॥सूक्तं॥ ॥१॥ ॥ ॥

चतुर्निर्माणरूपं त्वष्ट्रादीनां शुश्रूषणं तैः कृतमिति॥१॥ ॥द्वितीया॥ ये एवंभूता ऋभवः तेनः अस्माकं सुन्वते यजमानाय त्रिः त्रिकाले ष्वपि साप्तानि सप्तसंख्यानि। स्वार्थिको त्राण् प्रत्ययः। रत्नानि चतुर्वेदेतिहासपुराणपंचरात्राख्यानि गायत्र्यादिसप्तछंदांसि वा। दे वतांतरपक्षे तु चक्ररत्नमणिभार्याः निधिरश्चो गजस्तथा। एतानि सप्तरत्नानि पूर्वेषां चक्रवर्तिनामित्युक्तरत्नानि सुशस्तिभिः प्रशंसाहे तुस्तिर्गुणैर्युक्तं एकमेकं वा धत्तन प्रयच्छत। तशब्दस्य तनादेशः॥२॥ ॥तृतीया॥ जगतो धारकत्वेनस्वयं स्थिरत्वेन वह्निनामानः। धातूनाम नेकार्थत्वाद्वहतिरत्र धृत्यर्थः। ऋभवः सुकृत्यया सुकर्मणा देवेषु देवानां मध्ये यज्ञार्हं यज्ञियं भागं यज्ञार्हं भागं अभजंत अभजन्। अधारय त अधारयन्नपि। प्राप्तं यज्ञभागं अविछिन्नं यथा भवति तथा धृतवंत इत्यर्थः। कालांतरे स्थिरीकृतवंत इति फलितोर्थः॥ ॥३॥ ॥
आद्ये सूक्ते द्वितीयो वर्गः॥ ॥२॥ ॥सूक्तं॥ ॥१॥ ॥१२॥

स्तीये आख्या॥अछिन्नपत्राः निरंतरोपेततार्टकाख्यकर्णाभरणाः।अवैधव्यहेतुनानित्यसौभाग्यान्वोपेताः।नृपत्नीः नृपत्न्यः न
रो देवाः प्रधानपुरुषास्तेषां पत्न्यः।नृणांपालयितृहाद्वास्त्रीवाह्यविस्त्याः स्त्रीतनवः तद्भार्याश्च देवीः देव्यः अवसारक्षणकर्त्री
प्राणेनसाकंमहः महतः सर्वोत्तमस्यहवेः शर्मणा तत्तंबंधिमोक्षादिसुखंदत्तेतियावत्।नः अस्मान् अभि अभितः सचंतांरक्षंतु।
सचनरक्षणे॥१॥ ॥द्वितीया॥अहंइंद्राणींइंद्रस्यपत्नीं वरुणानीं वरुणपत्नीं अग्नायीं अग्नेः पत्नींच सोमपीतये सोमपानायस्व
स्तये सोमंपीत्वाऽस्मभ्यंसंततसौख्यंदातुमितियावत्।इहोपह्वये॥ईश्वरपक्षेतु स्वामित्वेनेंद्रादिसंबंधिनीमितिवापालकतया
इंद्रादिपत्नीत्वेनवाइंद्राण्यादिशब्दैः स्त्रीतनवोग्राह्याः।पुंयोगादाख्यायामितिङीष्।इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवन

अभिनोदेवीरवसामहःशर्मणानृपत्नीः।अछिन्नपत्राःसचंतां॥इहेंद्राणीमुपह्वयेवरुणानींस्वस्तये।अग्नायीं
सोमपीतये॥महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां।पिपृतांनोभरीमभिः॥ ॥अभि।नः।देवीः।अव
सा।महः।शर्मणा।नृऽपत्नीः।अछिन्नऽपत्राः।सचंतां॥इह।इंद्राणीं।उप।ह्वये।वरुणानीं।स्वस्तये।अग्ना
यीं।सोमऽपीतये॥मही।द्यौः।पृथिवी।च।नः।इमं।यज्ञं।मिमिक्षतां।पिपृतां।नः।भरीमऽभिः॥ ॥

मातुलाचार्याणामानुगितिआनुगागमेइंद्राणीत्यादिरूपं।वृषाकप्यग्निकुसितकुसीदानामुदात्तइतिअग्निशब्दस्यैजा
देशोअग्नायीतिरूपंध्येयं॥२॥ ॥तृतीया॥महीमहतीद्यौः पृथिवी विशेष्याः स्त्रीरूपेवाश्रीभूमीवास्युः पृथिवीलोकाभिमानि
न्यौनः अस्मदीयंइमंयज्ञं मिमिक्षतांस्वरात्तां।आगच्छतां।आगत्यचभरीमभिः।भृञोभावेइमनिप्रत्ययेगुणश्च।भरणैः नः
अस्मान्पिपृतांपालयेतां।दुःखेभ्यइतिशेषः।पृपालनपूरणयोर्लोटिअंतर्णीतणिच्॥ ॥३॥ ॥

द्वितीया॥ वयं चित्रस्य राधसः उत्तमस्य सिद्धिरूपस्य वसोः वसुनः विभक्तारं सदा विभज्य दातारं यस्य यथा योग्यं तस्मै तावतो दा
तारं नृचक्षसं नृणां जीवानां द्रष्टारं अशेषपुण्यपापादिविशेषैः सह जीवचैतन्यसाक्षिणं। चक्षिङः ऽसुन्। सवितारं हवामहे आ
ह्वयामः॥२॥ ॥तृतीया॥ हे सखायः ऋत्विजः आभ अस्मत्समीपमागत्य निषीदत। कुतः। नु इदानीं नः अस्माकं अभीष्टस्य दाता स
विता स्तोम्यः स्तोतव्यः यः सः सविता राधांसि सिद्धीः शुंभति अंजसा शोभयति। शुभ शुंभ शोभार्थे इत्यस्मात्॥३॥ ॥चतुर्थी॥
यथा प्रतीता एव नः परं देवताः ज्ञेयाः। हे अग्ने उशतीः यज्ञागमनं कामयमानाः देवानां पितृत्वात्पतीत्युक्ताः हरिस्त्रीतनूः। पत्युर्नो
यज्ञसंयोग इति नाथितं। देवपत्नीश्च प्रागुक्तनि उक्त्या त्वष्टारं हरिं प्रसिद्धं त्वष्टारं च सोमपीतये इह उपावह। यज्ञे संनिहितान् कुर्वित्य

विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसं॥ सखाय आ नि षीदत सविता स्तोम्यो नु नः। दाता राधांसि शुंभति॥
अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये॥ आग्ना अग्न इहावसे होत्रां यविष्ठ भारतीं। वरूत्रीं धिषणां वह॥५॥७॥
विऽभक्तारं। हवामहे। वसोः। चित्रस्य। राधसः। सवितारं। नृऽचक्षसं॥ सखायः। आ। नि। सीदत। सविता। स्तोम्यः। नु।
नः। दाता। राधांसि। शुंभति॥ अग्ने। पत्नीः। इह। आ। वह। देवानां। उशतीः। उप। त्वष्टारं। सोमऽपीतये॥ आ। ग्नाः।
अग्ने। इह। अवसे। होत्रां। यविष्ठ। भारतीं। वरूत्रीं। धिषणां। वह॥ ॥५॥ ॥६॥

र्थः॥४॥ ॥पंचमी॥ हे यविष्ठ युवतम अग्ने अधियज्ञे ग्नाः ग्नीहिनइत्यचो [illegible] भगवदीयस्त्रीतनूः नदीश्च होत्रां आहूयमान नितुक्ता
त्वादाह्वानमंत्राभिमानिनीं होत्रामित्युक्तां। हेञ् स्पर्धायां इत्यतः कर्मणि करणे च त्र प्रत्ययः। संप्रसारणं च बहुलग्रहणात्। वरूत्रीं वरणीय
तां जगतस्त्राणाद्वा वरूत्रीत्युक्तां। वृणोतेः कर्मण्युकारः। त्रायतेष्ट्रप्रत्ययः। टित्वात् ङीप्। वरूश्च सा त्रीश्च वरूत्रीं तां। धिषणां बुद्धिस्वरूपिणीं
सर्वबुद्धिप्रेरकां सर्वबुद्ध्यभिमानिनीं च भारतीं भरतस्य वायोः स्वामित्वसंबंधात्स्त्रीत्वसंबंधाद्वा भारतीत्युक्तां विष्णोः स्त्रीतनुं भारतीदेवीं
च। धिषणामित्यस्य कनिमित्ताभ्यां श्रीदेवीमिति वार्थः। अवसे अस्मद्रक्षणाय इह यज्ञे आवह। भानेण ततत्वात् अतिगुप्तत्वादिति
यावत्। भ्रनंतो वायुः। तनोतेः कर्मणि डः॥५॥ ॥तृतीये सूक्ते द्वितीयो वर्गः॥ ॥२॥ ॥श्रीसीतारामचंद्रायनमः॥ ॥

२

तद्विष्णोरिति॥ विष्णोस्तत्परमं ब्रह्म शिवादित्य॥ अयं तत्परमं पदं स्वरूपं सूरयः सम्यग्निर्मुक्ताः नहि पुरुषाः सूरयः तत्
सर्वदा पश्यंति॥ न तस्या द्रष्टा ऽवस्थाला उत्वेदस्य अऽनिष्क्रांतः मुक्ता एवं चतुस्सदा पश्यंति तत्र हेत्वंतरं पतिद्वानिभ्याग्नीकाया मनुभा
नेनत्सागं यनाह॥ दिवीवेति॥ दिवि आततं चक्षुरिव॥ यथा दिवि आकाशे व्याप्तमपि चक्षुर्न दृश्येत॥ किंतु अयं चक्षुर्मानुरू
